***काव्यकोषः*** २०११ तमे वर्षे प्रकाशितः। नैककाव्यविधानामत्र समावेशात्काव्यकोष इत्याख्याऽन्वर्थास्ति। काव्यकोषेऽस्मिन् सर्वासु रचनासु गीतिमाधुरी अनुभूयते। अत्र प्रबन्धमुक्तकयोः सम्मेलनं वर्तते। तेषु द्वे लघुप्रबन्धकाव्ये त्रीणि गीतानि षोडश पर्यायबन्धाश्च वर्तन्ते। कविरत्र उन्मुक्ततया हृदयस्थान् स्वान् भावान् प्राकाशयत्। उदाहरणत्वेन गीतमेकमवलोकनीयम्-

**श्रूयते मधुरा सुधा गरलं परं कटु पीयते**
**भग्नतरिरेषा कथञ्चिज्जलधिपारं नीयते।**
**तिमिरतति विहतेह दृष्टिर्दिग्भ्रमेण विमोहितोऽहम्**
**वीचिभिश्च वहामि सततं लेशतोऽपि न शङ्कितोऽहम्।**
**कोऽपि मामवितुं सयत्नः सत्यमिति सन्धीयते॥श्रूयते.॥** [28]

***पर्यायबन्धचरितम्*** नवसर्गात्मकं महाकाव्यं वर्तते। इदं २०१५ तमे वर्षे प्रकाशितम्। अस्मिन्काव्यस्य भेदविशेषमिदं पर्यायबन्धचरितं साङ्गोपाङ्गं वर्णितमस्ति। अत्र कवेः कल्पना अद्वितीया विद्यते। महाकवेरस्य स्वप्नावस्थायां पर्यायबन्धकाव्यं समागत्य आत्मानमुद्धर्तुं तं निवेदयति। तदनुरोधेन शास्त्रीयस्यास्य काव्यभेदस्य विस्तरेण सः निरूपणं विदधाति।

***शक्तिविलासकाव्यम्*** २०१६ तमे वर्षे प्रकाशितम्। अस्मिन् काव्ये सीतायाः पूर्वजन्मनः वृत्तान्तः वर्णितोऽस्ति। काव्यस्यास्य कथानुसारेण सीता पूर्वस्मिन् जन्मनि देवगुरोः बृहस्पतेः पुत्रस्य कुशध्वजस्य पुत्री वेदवती आसीत्-

**वेदवती प्रथिता सा सार्थकनाम्नी स्वतेजसा दीप्ता।**
**कुन्दकुसुमतनुकान्त्या भान्ती सुतरां सुकोमलावयवा॥** [29]

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-44 , YEAR 11, VOL -I, DOI-30-01-2021 Since 2010

इयं पितुः प्रतिज्ञया स्वाभिलाषेण च प्रेरितमतिः हिमिगिरेः एकस्मिन् रम्यकानने भगवन्तं विष्णुं वरं चिकीर्षुः तपस्यारतासीत्। तदानीं रावणेन दृष्टा सा बलात् अवमानिता। ततः सद्यः करं करवालीकृत्य रावणस्पृष्टान्स्वकेशानाच्छिद्य दुष्टं रावणं च कोपारुणलोचनाभ्यां ज्वालयन्ती – 'अहमागमिष्यामि त्वां सान्वयं विनाशयितुं तव नगरीं लङ्काम्' इत्युक्त्वा स्वयं यज्ञाग्निं प्राविशत्-

**इत्युक्त्वा सा यज्ञवह्नौ शरीरं भस्मीभूतं पश्यतस्तस्य साध्वी।**
**क्षोभात् क्रोधात् तत्क्षणे वै व्यधत्त पौष्पीवृष्टिस्तत्रजाता नभस्तः॥** 30

रावणवधोपयोगिसर्वघटनायोजने अस्या एव प्रमुखं योगदानमस्ति। वस्तुतो रामः स्वयं रावणं नैव जघान अपितु सीतैव तेन तस्य वधमकारयत्। रावणवधे रामः कारणं, कर्त्री च सीतैवास्तीति कविना अत्र प्रत्यपादि-

**सेयं नीलसरस्वतीप्रकटिता रामस्यचित्ते तदा**
**पश्यन्तीव जगद्दृशा करुणया विद्या द्वितीया परा।**
**मुण्डानां प्रकरच्छलेन दधती वर्णावलीं सुप्रभां**
**विज्ञानं ददती प्रसन्नमनसा रामे विभाता च सा॥** 31

हते तस्मिन् दशकन्धरे देवाः महर्षादयश्च शान्तिमवाप्य रामस्य कीर्तिगाथां गीतवन्तः। तदा सीता सहस्रास्यरावणस्य कथामश्रावयत्। तस्य वधानन्तरमेव राघवस्य यशोगाथागानं युज्यत इत्यपि सा अकथयत्। तदनु समराङ्गणमागतैः रामसैनिकैः असुरसैनिकाः पराभूताः। पश्चाच्च असुरेश्वरस्य सहस्रास्यरावणस्य बाणप्रहारेण रामः मूर्च्छितः। तदवलोक्य सर्वाङ्गसुन्दरी सा सीता करालवदना काली संवृत्ता। स्वकीयखड्गेन सर्वान् दानवसैनिकान् च संहृत्य तस्य दानवराजस्यापि शिरश्चिच्छेद। अन्ते च लब्धचेतनो रामः जानक्याः स्तुतिं विधाय सदलबलम् अयोध्यां प्रातिष्ठत।

***अमृतमन्थनम्*** महाकाव्यं वर्तते। राष्ट्रियसंस्कृतसंस्थानेन २०१६ तमे वर्षे अस्य प्रकाशनं कृतम्। पञ्चदशसर्गात्मकस्य महाकाव्यस्यास्य नायकः दैवरातिर्याज्ञवल्क्यः वर्तते। अयं महर्षिः मिथिलाधिपतेः जनकस्य गुरुः आसीत्। अस्मिन् महाकाव्ये याज्ञवल्क्यस्य आचाराः विचाराश्च वर्णितास्सन्ति। महाकाव्यस्यास्य नाम अमृतमन्थनमिति सर्वथा अन्वेति। पित्रा देवरातेन शिशुः याज्ञवल्क्यः अध्ययनार्थं व्यासशिष्यवैशम्पायनस्य सकाशं प्रेषितः। तत्र सम्पूर्णमनोयोगेन अध्ययनं विधाय याज्ञवल्क्यः परं वैदुष्यमवाप्तवान्।

**तस्याशयं स च विवेद विनैव वाचं कृत्वा मनोऽभिलषितं मुदितं चकार।**
**प्रीतो गुरुः सकलशिष्यगुणाधिकाय तस्मै श्रुतीरुपदिदेश सुभाजनाय॥** 32

परन्तु दैवयोगात् गुरोः वैशम्पायनस्य सः कोपभाजनः सञ्जातः।अत एव तस्मादधीतां समस्तवेदविद्यां सः प्रत्यर्पयितुमाह-

**इत्युक्तवन्तं तपसोऽभिमानाद् विमूढदृष्टिं निजशिष्यमेतम्।**
**विप्रावमन्तारमलं विगर्हयन् जगाद विद्यां त्यज मे त्वदर्पिताम्॥** 33

गुरोराज्ञया ततोऽधिगतां समस्तवेदविद्यां तत्पुरस्तादुद्गीर्य रिक्तविद्यो निस्तेजसा असौ चिरं संज्ञाशून्यं समजनि। तदनु धृतिं श्रद्धां भक्तिञ्च सुदृढमाकलय्य प्रज्ञागुरुं भगवन्तं भास्करं सुचिरं ध्यायन् सुप्रसन्नाननः याजुषमन्त्रान् प्रसादरूपेण प्राप्नोत्-

**स्तुतो रविस्तेन सुभक्तिचेतसा परं प्रसन्नो मुनये यजुर्गणम्।**
**अयातयामं हयरूपधृग् ददौ स दैवराति कृतकृत्यतां ययौ॥** 34

अनेन महर्षिणा साक्षात्कृतो वेदराशिः 'शुक्लयजुर्वेदः' इति नाम्ना सुप्रसिद्धः। याज्ञवल्क्यस्य भार्याद्वयमासीत्- कात्यायनी मैत्रेयी चेति। कात्यायनी गृहाश्रमकार्यकुशला पतिसेवापरायणा आसीत्। मैत्रेयी नितरां मेधाविनी ब्रह्मवादिनी च बभूव। अस्य ऋषेः जीवनं सर्वेषां कृते अनुकरणीयं वर्तते। विनीतोऽयं ऋषिपुत्रः गृहाश्रमे गार्हस्थ्यकर्मधर्ममाचरन् वैदुष्ययशः परितः प्रसारयन् अन्ते च संन्यासमाश्रयन् शील-सौजन्यवैदुष्यविभूषितां जिज्ञासावतीं प्रियपत्नीं मैत्रेयीं प्रति ब्रह्मविद्योपदेशं चकार।

**विरक्तिरतुला भवे समनुरक्तिरेषा तव**
**विभौ परमपावने प्रियतमे प्रभौ निश्छला।**
**तमेव प्रतिपादयन् किमपि वच्मि श्रव्यं शुभे!**

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-44 , YEAR 11, VOL -I, DOI-30-01-2021 | Since 2010

**निशम्य हृदि धार्यताममृततत्त्वमेतत्त्वया ॥** 35

***उद्यानसौरभम्*** मुक्तककाव्यसङ्ग्रहो विद्यते। अस्य प्रकाशनं २०१८ तमे वर्षे अभवत्। १९९५ तमात् वर्षात् पूर्वं महाकविना ठाकुरमहाशयेन प्रणीताः रचनाः अस्मिन् प्रकाशिताः वर्तन्ते। सङ्ग्रहेऽस्मिन् नैकप्रकारकाः रचनाः सङ्कलिताः विद्यन्ते। विषयानुसारेण ताः चतुर्धा विभक्ताः सन्ति। प्रथमस्तत्र दिव्यकुसुमावली वर्तते।अस्मिन् भागे देवस्तुतिपरकाः रचनाः वर्तन्ते। मातरं करुणामयीमुद्दिश्य कविः कथयति-

**अपि करुणामयि नादय मधुरं तन्त्रीस्वरमविरामम्।**
**जनमानसजडतामपनोदय सदयं पश्य समानम्॥** 36

द्वितीयस्तु निसर्गकुसुमावलीति। कविद्दशा दैवीभक्तिरिव प्रकृतिसौन्दर्यप्रेमापि मानवानां चेतसि बद्धमूलमिवास्ति। प्रकृतिः अस्माकं विविधभावानां विभावतां प्रपद्यते। आलम्बनोद्दीपनाभ्यां विभावो द्वैविध्यमापद्यते। प्रातरुदयन्नरुणवर्णो भास्करः, उद्याने सुमनः, पादपेषु सुमनोरसं पिपासवो मधुकराः, निर्मलनभसो वर्षन्त्यश्चन्द्रिकाः, सकलकलं वहन्त्यः सरितः पश्यतां मनो भृशं प्रसादयन्ति। कदाचिदियं प्रकृतिः अस्माकं मनसि सुखं दुःखञ्च समुद्दीपयति। सत्यमेवोच्यते यत् निसर्गसौन्दर्यं बलात् मानवमनः समाकर्षति। अस्मिन् भागे निसर्गकुसुमावल्यां प्रकृतेः परिवर्तितरूपाणां षण्णामृतूनां सौन्दर्यस्य काले काले समापतितायाः प्रकृतिभीषणतायाश्च वर्णनं विद्यते। वसन्तमुद्दिश्य कविः कथयति-

**हेमन्तशिशिरजडतामपास्य प्रालेयतिमिरजालं निरस्य।**
**सत्वरमुपेहि बन्धो वसन्त! पिकमधुरगानगुञ्जितदिगन्त॥**
**मधुपालिमधुरगीतं प्रसरतु श्रुतिपुरे भवतु मधुमयं मनः।**
**विषमयविषादमूर्च्छितो हन्त! तव नास्तु शासने कोऽपि जनः॥** 37

तृतीयस्तावत् स्वदेशकुसुमावली। भागेऽस्मिन् काले काले रचितानि राष्ट्रसम्बद्धानि अनेकानि गीतानि सङ्कलितानि विद्यन्ते। भारतमातुः सुपुत्राणां वीरसैनिकानां शौर्यगाथां गायन् कविः वर्णयति-

**विपत्तयः पदे पदे भवन्तु निर्भया इमे**
**स्वदेशमानरक्षणे सदैव तत्परा इमे।**
**असूनपि त्यजन्ति, न स्वदेशगौरवं महत्**
**सुकीर्तिचन्द्रिका दिगन्तविश्रुता भटा इमे॥** 38

अन्ते चतुर्थस्तु प्रकीर्णकुसुमावलीति वर्तते। अस्मिन् भागे प्रकीर्णान् विविधान् विषयानधिकृत्य कविः स्वीयं रचनापाटवं प्रादर्शयत्। कविना विरचितस्य चायाष्टकस्य एकः श्लोकः अत्र प्रस्तूयते-

**प्रातर्भजामि मनसा वचसा धियापि प्रेम्णा प्रियाकरसमर्पितचायमिष्टम्।**
**हृद्यं प्रियाधरसुधासमस्वादुकोष्णं पेयोत्तमं मतिमतां प्रतिभाकरञ्च॥** 39

***मेवाडस्वाभिमानम्*** ऐतिहासिकं लघुकाव्यं वर्तते। २०१८ तमे वर्षे अस्य प्रकाशनं सञ्जातम्। अस्मिन् मेवाडमहाराजस्य रत्नसिंहस्य महिष्याः पद्मिन्याः बुद्धिमत्ता शौर्यगाथा च वर्णितास्ति। कविः स्वयं कथयति-

**शक्तिर्मूर्त्तिमती सतीकुलमणिःपद्मेव दिव्यानना**
**सम्मानाय जुहाव जीवनमिदं निर्भीकचित्तं पुरा।**
**राजस्थानसुगौरवं सुमुकुटं चित्तौडदुर्गस्य या**
**तस्या भव्यकथा सुधा सहृदयाः! श्रुत्या क्षणं पीयताम्॥** 40

नीतिपटीयसी सा विपत्तिकाले स्वकीयविवेकेन भारतीयसंस्कृतिरक्षणपुरस्सरं स्वीयं सतीत्वं कथं रक्षितवतीति अतीव सुष्ठुतया काव्येस्मिन् वर्णितमस्ति। पद्मिन्याः सतीत्वसंरक्षणपरा जौहरकथा अत्र निबद्धा वर्तते। तया सह दुर्गस्थाः सर्वाः अपि वीररमण्यः गोमुखे कृतस्नानाः स्वीयं स्वीयं पतिं स्मृतिपथमानीय समिद्धचैत्यानले स्वकोमलकलेवराणि निपात्य सतीत्वं स्वात्माभिमानञ्च ररक्षुः-

**अल्लोद्दीनविशालजलधौ मेवाडवीरेष्वथो**

**हस्त्युष्ट्रादिविरावभीषणतरे मग्नेषु सा पद्मिनी।**
**बह्वीभिः खलु राजपुत्ररमणीभिर्गोमुखे पावने**
**स्नात्वा प्रीतिभरेण स्वप्रियपतिं स्मृत्वा प्रविष्टा चिताम्॥** 41

अपि च खिन्नं कविहृदयं भुविभारभूतानां नरराक्षसानां तेषां कुकृत्यं भर्त्सयन् अग्रे कथयति-

**सौन्दर्यं लोपमापत् सकलमपि जगत्सारशून्यं च जातं**
**सृष्टेः सम्पद्विनष्टा निधिरिव मनसो लुण्ठितस्तस्करेण।**
**भूमेर्भव्या सरस्याः सुरभितमृदुला पद्मिनी कापि गीर्णा**
**शुण्डादण्डेन रोषात् कलुषितमतिना हस्तिना हन्त कस्मात्॥** 42

***किं किं न साधयति कल्पलतेव विद्या*** इति खण्डकाव्यं वर्तते। अस्य प्रकाशनं २०१९ तमे वर्षे अभवत्। महाकविः रामजीठाकुरः अस्मिन् काव्यद्वयं सन्निवेशयत्। अनयोः प्रबन्धयोः द्वयोः भ्रात्रोः वैदुषी वर्णिता वर्तते। मिथिलापाण्डित्यपरम्परायां कीर्त्तनीयचरितेषु अन्यतमौ वर्तेते म.म. सचलप्रसिद्धभवानीनाथमिश्रः मोहनमिश्रश्च। प्रथमं ह्यत्र सचलमिश्रमधिकृत्य ‘को विदेशःसुविद्यानाम्’ इति काव्यं विद्यते।

पुरा मिथिलायामपि व्याकरणदर्शनादिशास्त्राध्ययनं विद्वत्समाजे प्रतिष्ठास्पदं मन्यतेस्म।लोकधारणानुसारेण साहित्यं ते सुकुमारमतयो राजपुत्रादयो पठन्ति येषां कठिनशास्त्राध्ययने प्रवृत्तिर्न भवति। अर्थात् मन्दमतीनां साहित्यमेव शरणमिति। विद्वत्सु इयमप्युक्तिः प्रसिध्यतितराम्- ‘शास्त्रेषु भ्रष्टाः कवयो भवन्तीति’। द्वितीयश्चाक्षेपः क्रियते- साहित्यशास्त्रे न कोऽपि स्वतन्त्रः सिद्धान्तो प्रतिपादितोऽस्ति, तत्र विविधशास्त्राणां सिद्धान्तसञ्चयः कृतोस्ति। परन्तु सचलमिश्रवर्याः पुणेनगर्य्यां पेशवाराजसभायां साहित्यपताकां समुन्नीय स्वीयं वैदुष्यं सर्वत्र ख्यापितवन्तः-

**राजसभां सम्प्राप्तः किं तच्छास्त्रं विशिष्यतेऽधीतम्।**
**इति पृष्टः प्राहस्म सचलः साहित्यमस्ति मे पठितम्॥**
**शास्त्रान्तरमपि पठितं तदङ्गरूपेण गुरुमुखाम्भोजात्।**
**अनुशीलितं च यत्नात् सदैव सर्वत्र भारतीमुखरा॥** 43

सचलमहाशयस्य वाक्यमिदं श्रुत्वा आस्थानविद्वान् कश्चन आपत्तिं प्राकटयत्-

**इत्युत्तरञ्च श्रृण्वन् विद्वानेको जगाद साक्षेपम्।**
**कथितं किमिति भवद्भिः कथमिव साहित्यमङ्गिताधत्ताम्॥** 44

तस्य विदुषः प्रश्नमिमं श्रुत्वा विविधैः प्रमाणैः मैथिलोऽयं साहित्यविद्यायाः शास्त्रत्वं प्रत्यपादयत्। तत्र सर्वे विद्वांसः समाहिताः सचलवर्येण-

**साहित्यं हि प्रधानभावमखिलं न्यायादिषड्दर्शनं**
**गौणत्वञ्च नयन् सुधीः खलु सभां स्तब्धां व्याधाद् युक्तितः।**
**सम्मानेन समर्चितः स सचलो दोलां समारूढवान्**
**दत्तस्कन्धमहीभुजा बुधसभारत्नायमानः कृती॥**45

द्वितीयं काव्यमत्र ‘मानो हि महतां धनम्’ इति वर्तते। इदं काव्यं सचलमिश्रस्यानुजं पण्डितमोहनमिश्रमधिकृत्य रचितं वर्तते। बालः मोहनः क्रीडासक्तोऽध्ययनपराङ्मुखो बभूव। किन्तु मतिमत्या तन्मात्रा भोजनकाले भेदोपायेन तमपि सत्पथमानीय तद्वैदुष्यलाभे प्रयोजककर्तृतां सफलं निरवहत्। मातृकृतपङ्क्तिभेदेन वाग्बाणेन च मर्माहतो मोहनः मङ्गलवनीति स्थानं गत्वा कोटीश्वरनाम्नः शिष्यवत्सलसद्गुरोः व्याकरणसाहित्यदर्शनादिविद्याम् अधिगत्य प्रसिद्धं वैदुष्यमासादयत्। तस्य पाण्डित्यप्रशंसा सर्वत्र प्रसृता। बहुशो धनसम्पन्नाः विद्यानुरागिणो गृहस्थाः महीपाश्च समादरेण तस्मै प्रभूतं धनं मानं ग्रामञ्च प्रायच्छन्। इत्थं स्वदेशे निजवैदुषीं विस्तार्य स्वाग्रज इवायमपि पेशवाराजसभामगमत्। यतः तत्र वैदुष्यसम्मानमवाप्य पण्डितः सर्वत्र पूज्यतेस्म।

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-44 , YEAR 11, VOL -I, DOI-30-01-2021 | Since 2010

कविना उच्यते यत् प्राधान्येनायं वैयाकरण आसीत्। तत्र विद्वत्सभायां पृष्टान् सर्वान् व्याकरणशास्त्रीयान् प्रश्नान् समाधायासौ राजसभायां सम्मानितः। अस्याग्रजः एकलक्षमुद्राभिः सम्मानितः। परन्त्वयं पुरस्कारराशित्वेन स्वाग्रजापेक्षया मुद्रामेकां न्यूनां प्राप्य स्ववैदुष्यतिरस्कारममन्यत। तद्राशिञ्च अगृहीत्वैव स्वोपास्यं मथुराधीशं तच्छक्तिभूतां राधाञ्च संस्मरन् मथुरापुरीं प्रास्थात्-

**राधामाधवपादपङ्कजरजो ध्यात्वाऽचलन्मोहनः**
**पूणेतो मनसि व्यथामनुभवन् श्रीमोहनं संस्मरन्।**
**आयातो मथुरां तदीयनगरीं प्रीत्योल्लसन्मानसः**
**नत्वा तद्गुणगौरवस्तवमसौ चक्रे च रोमाञ्चितः॥** 46

सायं मथुरापुरीं सम्प्राप्य भक्तो मानी विद्वान् मोहनः श्रीगोविन्दं प्रणम्य स्तुत्वा च श्रान्तः तस्मिन्नेव मन्दिरप्राङ्गणे निद्रां प्रापत्। रात्रौ च भगवान् मथुराधीशः मन्दिरस्य अर्चकं स्वप्ने आदिशत्- 'ममायं नितरां प्रियो भक्तो मोहननामा त्वया लक्षं मुद्राः प्रदाय सम्माननीयः।मम प्रियोऽयमतिथिः साम्प्रतं ममालयमागतोऽस्ति, अयं सर्वथा सेव्यः। यावदयमत्र तिष्ठति तावत्त्वयाऽस्य सर्वविधा व्यवस्था विधेयेति।' प्रातस्तस्मै अर्चकः लक्षं मुद्राः प्रदाय मन्दिरनिकट एव तस्यावासव्यवस्थां व्यधात्। कविः कथयति-

**भक्तेः शक्तिमवाप्य पण्डितमणिः प्रापत् प्रभूतं धनं**
**श्रीशात्तन्मथुराधिपात् स्वयमसावातिथ्यमप्याप्तवान्।**
**चञ्चच्चन्द्रकराभमुज्ज्वलतरं लब्ध्वा यशो व्यापकं**
**भूत्वाप्येष दिवङ्गतोऽपि मतिमान्वित्ते सदा तिष्ठति॥** 47

एतादृशस्य म.म.मोहनमिश्रस्य मानोन्नतं वैदुष्यपूर्णं जीवनवृत्तमादाय **"मानो हि महतां धनम्"** इति शीर्षकं लघुकाव्यम् आचार्यरामजीठाकुरेण प्रणीतं वर्तते।

महाकवेः रामजीठाकुरस्य मौलिकरचना यथा संस्कृतभाषायां वर्तते तथैव मैथिलीभाषायामपि विद्यते। **आत्मगगनपथ** इति नामकः मैथिलीकवितासङ्ग्रहः अस्य प्रकाशितो वर्तते। सङ्ग्रहेऽस्मिन् विविधप्रकारकाः कविताः सन्ति। मैथिलीभाषायामेतदतिरिच्य द्वौ अनुवादौ अपि वर्तेते। म.म.कृष्णसिंहठाकुरेण प्रणीतस्य **खण्डवलाकुलदीपिका**याः तथा च पं. यदुनाथमिश्रप्रणीतस्य **समासशक्तिदीपिका**याः अनुवादः आचार्येण रामजीठाकुरमहाशयेन कृतः। आचार्यः ठाकुरः काव्यशास्त्रेऽपि पूर्वाचार्यैः प्रतिपादितानां काव्यसिद्धान्तानां सयुक्तिकं विनूतनं व्याख्यानमकरोत्। स्वकीयकाव्यसाधनया असौ महाकवित्वमवाप्नोत्। यावज्जीवमग्निहोत्रं जुहोतीति सिद्धान्तानुसारेण षडाशीतिवर्षदेशीयः असौ महाकविः सम्प्रत्यपि अर्वाचीनसंस्कृतसाहित्यस्य श्रियः संवर्धनार्थं अहर्निशं दत्तावधानो विद्यते।

## अन्तटिप्पणी

01. गीता-२/५६
02. वैदेहीपदाङ्कम् /प्र.स./21
03. तत्रैव, द्वि.स. /36
04. तत्रैव,च.स. /36
05. राधाविरहम् 7
06. तत्रैव 251
07. तत्रैव 133
08. तत्रैव 31
09. प्रेमरहस्यम् /03
10. अभि.शा. 2/1
11. प्रेमरहस्यम् 49

[A First International Electronic Peer-reviewed Quarterly Refereed-
**UGC Approved** (41039), **SCOPUS** Registered Sanskrit Tri-lingual Journal with **Journal Factor**]
**URL-** www.jahnavisanskritejournal.in **ISSN**-0976-8645 **ISSUE**-44 , **YEAR** 11, **VOL** -I, DOI-30-01-2021 | Since 2010

12. तत्रैव 50
13. बाणेश्वरीचरितम्-16
14. तत्रैव 17
15. गोविन्दचरितम्, प्रस्तावना
16. तत्रैव 1/27
17. तत्रैव 1/8
18. सतीपरीक्षा 38
19. तत्रैव 39
20. तत्रैव 40
21. तत्रैव 68
22. पार्वतीतपस्या 01
23. तत्रैव 20
24. शक्तिसाधना 90
25. आर्याविलासः 31
26. तत्रैव – 34
27. तत्रैव - 35
28. काव्यकोषः, पृ. 64
29. शक्तिविलासकाव्यम् 1/7
30. तत्रैव 3/46
31. तत्रैव 8/10
32. अमृतमन्थनम् 1/39
33. तत्रैव 2/15
34. तत्रैव 2/30
35. तत्रैव 14/16
36. उद्यानसौरभम्, पृ.- 5
37. तत्रैव 45
38. तत्रैव 74/2
39. तत्रैव 103/2
40. मेवाडस्वाभिमानम् 10
41. तत्रैव 56
42. तत्रैव 59
43. कोविदेशः सुविद्यानाम् 32-33
44. तत्रैव 35
45. तत्रैव 82
46. मानो हि महतां धनम् 64
47. तत्रैव 84

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-44 , YEAR 11, VOL -I, DOI-30-01-2021 | Since 2010

# सन्दर्भग्रन्थसूची

1. वैयाकरणसिद्धान्तकौमुदी, सम्पादकः- श्रीकृष्णस्वरूप काव्यतीर्थ, प्रकाशकः- चौखम्भा ओरियन्टालिया, वाराणसी, तृतीयसंस्करणम्-1982
2. श्रीमद्भगवद्गीता, व्याख्याकारः- ए.सी. भक्तिवेदान्त स्वामी प्रभुपाद, प्रकाशकः- भक्तिवेदान्त ट्रस्ट, मुम्बई, प्रकाशनवर्षम्-1990
3. ध्वन्यालोकः, व्याख्याकारः- आचार्य जगन्नाथ पाठक, प्रकाशकः- चौखम्भा विद्या भवन, वाराणसी, षष्ठ संस्करण-1997
4. प्रेमरहस्यम्, प्रणेता- डा. रामजी ठाकुर, प्रकाशकः- प्रतिभा कम्युनिकेशन,दरभङ्गा, प्रकाशनवर्षम्-2003
5. अभिज्ञानशाकुन्तलम्, सम्पादकः-श्रीकृष्णमणि त्रिपाठी, प्रकाशकः- चौखम्भा सुरभारती प्रकाशन,वाराणसी, पुनर्मुद्रित संस्करण-2009
6. लघुप्रबन्धत्रयी, रचनाकारः- डा. रामजी ठाकुर, प्रकाशकः- राष्ट्रियसंस्कृतसंस्थानम्,नवदेहली, प्रकाशनवर्षम्-2009
7. काव्यकोषः, सम्पादकः- डा. लक्ष्मीनाथ झा, प्रकाशकः- रीता प्रकाशन, प्रकाशनवर्षम्-2011
8. आत्म गगन पथ, लेखकः प्रकाशकश्च- डा.रामजी ठाकुर, मुद्रकः- एकेडेमी प्रेस, दारागंज, इलाहाबाद, प्रकाशनवर्षम्- 2015
9. अमृतमन्थनम्, लेखकः- डा. रामजी ठाकुर, प्रकाशकः- राष्ट्रियसंस्कृतसंस्थानम्,नवदेहली, प्रकाशनवर्षम्-2016
10. शक्तिविलासकाव्यम्, सम्पादकः-डा. इन्द्रनाथ झा, प्रकाशकः- मनीष प्रकाशन,वाराणसी, प्रकाशनवर्षम्-2016
11. उद्यानसौरभम्, सम्पादकः- लक्ष्मीकान्त विमल, प्रकाशकः- विद्यानिधि प्रकाशन,दिल्ली, प्रथम संस्करण-2018

# वैशेषिकदर्शने शब्दस्य गुणत्वसिद्धिः

**डॉ. विश्वेशः वाग्मी**
सहाकाचार्यः, संस्कृतविभागः,
महात्मा-गाँधी-केन्द्रीय-विश्वविद्यालयः, बिहारः

**SID-** -323541868

**Received on**--8/11/2020 13:37:00 | **Accepted on-** 26th January, 2021

**प्रमुखशब्दाः**-वैशेषिकदर्शनम्, शब्दः, कणादः, गुणत्वसिद्धिः, उदयनाचार्यः, शङ्करमिश्रः, गुणः, अकारणगुणपूर्वकत्वम्, अयावद्द्रव्यभावित्वम्, आश्रयादन्यत्रोपलब्धिः।

## शोधसारः

श्रुतिकालादारभ्यैव भारतीयदार्शनिकैः शब्दस्य स्वरूपमभिलक्ष्य अनेके महत्त्वपूर्णाः सिद्धान्ताः प्रस्तुताः। वैशेषिकदार्शनिकाः कणादप्रशस्तपादप्रभृतयोऽचार्या अपि तत्र नापवादाः। वैशेषिकदर्शनानुसारं शब्दस्तु न द्रव्यरूपः, न कर्मरूपः, न वा सामान्यविशेषसमवायरूप अपितु चतुर्विंशतिर्गुणेष्वन्यतमः नित्यस्याकाशस्य विशेषगुणः श्रोत्रमात्रग्राह्यश्च वर्तत इति किन्तु शब्दस्य स्वरूपविषये दर्शनान्तरेषु मतभेदो दरीदृश्यते। यत्र चार्वाक-जैन-सांख्य-योग-मीमांसा(प्राभाकराः)-वेदान्त-न्याय-वैशेषिकदर्शनानि शब्दस्य गुणत्वं स्वीकुर्वन्ति तत्रैव मीमांसा(भाट्टाः)-व्याकरण-माध्व-शैवदर्शनानि अस्य द्रव्यत्वं ख्यापयन्ति। एतेष्वपि भाट्टमीमांसकाः विशेषतः विविधोपायैः शब्दस्य द्रव्यत्वं साधयन्ति। प्रस्तुतेऽस्मिन् शोधपत्रे न केवलं शब्दद्रव्यत्ववादीनामेतेषां युक्तियुक्तखण्डनं क्रियते अपितु शब्दस्य द्रव्यत्व-कर्मत्व-सामान्यत्व-विशेषत्व-समवायत्व-अभावत्वासिद्धिप्रदर्शनपूर्वकं सिद्धान्तोऽयं स्थिरीक्रियते यच्छब्दो गुण एव न द्रव्यम् तत्रापि च अकारणगुणपूर्वकत्वात्, अयावद्द्रव्यभावित्वात्, आश्रयादन्यत्रोपलब्धत्वात्, आत्मनि असमवेतत्वात्, श्रोत्रग्राह्यत्वात्, वैशेषिकगुणभावाच्च शब्दः पृथिव्यादिषु द्रव्येषु केवलमाकाशस्यैव गुणः इति वैशेषिकसिद्धान्तानां सुसम्बद्धरूपेणोपस्थापनं समग्रतया विश्लेषणञ्च विधीयते।

## ABSTRACT

Since the Vedic period, many important principles were presented by Indian philosophers by targeting the nature of the word. It was also presented by the Acharyas of the Kanada, Prashastpada, etc. According to the Vaishshik philosophy, the word is not a matter of substance, not Karma form, not Samanya-Vishesha but a special quality of a continual sky other than 24 Gunas which are assumed by the ears. But there are differences in the views about the nature of the word. While Charwalk, Jain, Sankhya, Yoga, Philosophy, Vedanta, Nyaya- Vaishshik accept the Guna of the word, but Bhatt Mimaamsa, Vyakarana, Madhva, Shaivas etc were include Sabda as matter. the philosophy of the same has been discussed in detail in this research paper.

भारतीयदर्शनपरम्परायां शब्दस्य तात्त्विकस्वरूपमभिलक्ष्यैका प्रमुखतमा समस्योपतिष्ठते **यच्छब्दः किंरूपः? द्रव्यरूपः? गुणरूपः? कर्मरूपः? उताहो कश्चन पदार्थरूपः? कस्तर्हि शब्दरूपः?** आदिकालादारभ्य विषयेऽस्मिन् अनेकविधं चिन्तनं प्रवर्तते। स्वयं महर्षिकणादोऽपि विषयममुं वर्णयति- शब्दस्यासाधारणधर्मत्वस्य श्रोत्रग्राह्यत्वस्य[27] समानासमानजातीयेषु पदार्थेषु कुत्राप्यनुलब्धत्वात् शब्दः किम्? द्रव्यं गुणो कर्म वेति संशयमुपपद्यते[28] - यदि शब्दो द्रव्यम् तर्हि समानजातीयेषु द्रव्येषु असमानजातीयेषु च गुणकर्मसु कुत्रापि श्रोत्रग्राह्यत्वं नोपलभ्यते न किमपि द्रव्यं श्रोत्रग्राह्यं नापि च गुणकर्मणि । यदि च शब्दो गुणः स्वीक्रियतां तथापि समानजातीयेषु गुणेषु असमानजातीयेषु वा द्रव्यकर्मष्वपि श्रोत्रग्राह्यत्वं नोपलभ्यते । अथ च शब्दस्य कर्मत्वमप्यभ्युपगम्यते चेत्तत्रापि समानजातीयेषु कर्मसु असमानजातीयेषु वा द्रव्यगुणेष्वपि श्रोत्रग्राह्यत्वस्यानुपलब्धत्वादियं शङ्का जायते[29]- कस्तर्हि शब्दः? द्रव्यं गुणो कर्म वेति[30]? एतदभिलक्ष्य शब्दस्य स्वरूपविषये दार्शनिकेषु परस्परं मतभेदो दरीदृश्यते -

1. **शब्दगुणत्ववादिनः-** साङ्ख्यदर्शनम्, योगदर्शनम्, मीमांसादर्शनम् (प्रभाकरमतम्), वेदान्तदर्शनम्, न्यायदर्शनम्, वैशेषिकदर्शनम्, चार्वाकदर्शनम्, जैनदर्शनम् ।
2. **शब्दद्रव्यत्ववादिनः -** मीमांसादर्शनम् (भाट्टमतम्), वैयाकरणदर्शनम् ।
3. **शब्दो न गुणः नापि द्रव्यम् –** बौद्धदर्शनम् ।

**मीमांसकानां शब्दद्रव्यत्वसिद्धान्तः-**

उपर्युक्तेष्वेतेषु दार्शनिकप्रस्थानेषु विशेषतः भाट्टमीमांसकाः विविधोपायैः शब्दस्य द्रव्यत्वं स्वीकुर्वन्ति[31] -

**(क)** शब्दस्य ग्रहणं (प्रत्यक्षं) स्वाश्रयिणः आकाशात्पृथगेव भवति, यदा च गुणाः द्रव्याश्रिताः एव गृह्यन्ते[32] ।
**(ख)** शब्दो साक्षादिन्द्रियसंयोगेन प्रत्यक्षीक्रियते, यथा घटो द्रव्यम्[33] ।

---

[27] श्रोत्रग्रहणो योऽर्थः स शब्दः । - वैशेषिकसूत्रम् 2.2.21

[28] (i) तुल्यजातीयेष्वर्थान्तरभुतेषु विशेषस्य उभयथा दृष्टत्वात् । - वै० सू० 2.2.22; तत्रैव च- वै० सू० रसायनव्याख्या 2.2.23; सुगमावैशेषिकसूत्रवृत्तिः 2.2.23
(ii) **टिप्पणी-** सुगमावृत्ति-रसायनभाष्ययोः तु “तस्मिन् द्रव्यं गुणं कर्मेति संशयः”। - वै० सू० 2.2.22 इति सूत्रमेवोपलभ्यते ।

[29] वैशेषिकसूत्रोपस्कारः 2.2.22, पृ० 181-182; सु० वै० सू० वृ० 2.2.23, पृ० 42-43; वै० द० रसा० 2.2.23, पृ० 94- 95

[30] केचन व्याख्याकाराः सूत्रस्यास्य प्रकारान्तरेण व्याख्यां कुर्वन्ति- शब्दे विशेषधर्मः संयोगजत्वं तुल्यजातीयेष्विन्द्रियैर्ग्राह्येषु रूपादिषु गुणेषु तद्भिन्नेषु द्रव्यकर्मषु च दृश्यते, तस्मात् संशयः शब्दो गुणो वा द्रव्यं वा कर्म वा । अथवा तत्रोभयप्रकारेण कोटिद्वयप्रकारेण न क्वपि दृश्यते विशेषधर्मो विभागजत्वम्, शब्दं विहाय न गुणेषु न द्रव्यकर्मसु दृश्यते तस्मात् संशयः । पुनश्चास्य विशेषधर्मः श्रोत्रेन्द्रियग्राह्यत्वं तन्न द्रव्ये नान्यगुणे न कर्मणि तस्मात् संशयः । - वै० द० ब्रह्ममुनिभाष्यम्, पृ० 35; वै० सू० वैदिकवृत्तिः, पृ० 52-53

[31] (i) श्रोत्रमात्रेन्द्रियग्राह्यः शब्दः शब्दत्वजातिमान् ।
द्रव्यं सर्वगतो नित्यः कुमारिलमते मतः ॥ - मानमेयोदयः, पृ० 222
(ii) Mishra, Umesha, Nyāya-Vaiśeṣika, pp. 140-141.

[32] वियद्गुणत्वं शब्दस्य केचिदूचुर्मनीषिणः ।
प्रत्यक्षादिविरोधात् तद्भट्टपादैरुपेक्षितम् ।। तत्र गुणस्य सर्वस्य साश्रयतया प्रतीमानत्वादिह च निराश्रयतैव प्रतीतिदर्शनात् प्रत्यक्षविरोधः। -मा० मेयो०, पृ० 222-223

[33] शब्दो द्रव्यं साक्षादिन्द्रियसम्बन्धवेद्यत्वात्, घटवत् । - न्यायलीलावती, पृ० 665

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-44 , YEAR 11, VOL -I, DOI-30-01-2021

Since 2010

**(ग)** संख्यावेगादयो गुणाः शब्दमाश्रित्यैव वर्तन्ते[34] गुणानाञ्च द्रव्याश्रितत्वं सर्वैः स्वीक्रियते[35]।
**(घ)** त्रैकालिकसंसर्गावच्छिन्नोऽयं शब्दः सर्वदा सर्वत्र सममेव गृह्यते। शब्दस्यैतत् सार्वकालिकग्रहणं तस्य विभुत्वं[36] नित्यत्वं[37] च द्योतयति । विभुत्वञ्च[38] द्रव्यस्यैव सम्भवति ।

एताभिः सर्वाभिः विशेषताभिः ज्ञायते यच्छब्दो द्रव्यं[39] न तु गुणः । वैयाकरणैरपि मीमांसकाभिमतं शब्दस्य द्रव्यत्वमेव स्वीक्रियते[40] ।

**शब्दस्य द्रव्यत्वनिरासः-**

वैशेषिकैः शब्दद्रव्यत्ववादीनामेतेषां युक्तियुक्तखण्डनैः सिद्धान्तोऽयं क्रमशः स्थिरीक्रियते **यच्छब्दो गुण एव न खलु द्रव्यमिति-**

**(क)** 'शब्दस्य प्रत्यक्षं स्वाश्रयिण आकाशात्पृथगेव भवतीति शब्दो न गुणः' इति भाट्टानामेष ऊहः व्यर्थ एव, इन्द्रियाणि प्रायशः द्रव्यस्थान् गुणानेव गृह्णन्ति, गुणानाम् आश्रयद्रव्याणां ग्रहणमिन्द्रियैः न क्रियते । इत्यतः गुणप्रत्यक्षे आश्रयद्रव्यस्य प्रत्यक्षं स्यादेव नास्त्येतदावश्यकम्। तद्यथा- चक्षुरिन्द्रियेण घ्राणेन्द्रियेण वा क्रमशः रूपगन्धयोः ग्रहणे सति एतदनिवार्यं नास्ति यत्तयोः आश्रयद्रव्ययोः अपि ग्रहणं भवत्येव। एतस्मादाश्रितत्वमेव गुणत्वस्याधारत्वमिति नियतं नास्ति। अतः यद्यपि गुणानां द्रव्याश्रितत्वं भवतु नाम किन्तु द्रव्याश्रितत्वमेव तेषां लक्षणमिति नाङ्गीक्रियते[41] ।
**(ख)** मीमांसकानां शब्दस्य साक्षादिन्द्रियसंयोगत्वशङ्कायां हेतोरसिद्धापत्तिः[42] ।
**(ग)** सङ्ख्यावेगादयो गुणाः वायोः सन्ति न तु शब्दस्य । वायोः शब्दस्य वाहकत्वात्[43] तद्गुणाः शब्दस्येत्युपचर्यन्ते भ्रान्तिवशात् यथा अज्ञानवशात् **'गौरोऽहम्' 'अन्धोऽहमिति'** शारीरकधर्मा आत्मनि आरोप्यन्ते[44] ।

---

[34] संख्याशब्दवेगादयोऽपि हि शब्दधर्मा अनुभूयन्ते । तदेव, पृ० 666
[35] स्वयं वैशेषिकाः - (i) द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम् । - वै० सू०, 1.1.16
(ii) रूपादीनां गुणानां सर्वेषां गुणत्वाभिसम्बन्धो द्रव्याश्रितत्वं निर्गुणत्वं निष्क्रियत्वम् । - प्रशस्तपादभाष्यम्, पृ० 60
(iii) अथ द्रव्याश्रिता ज्ञेया निर्गुणा, निष्क्रियाः गुणाः । - भाषापरिच्छेदः, कारिका 86
[36] विभुत्वाच्च द्रव्यम् । - पदार्थदीपिका, पृ० 39
[37] मीमांसादर्शनम्, तर्कपादः, 6-23
[38] सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वम् । - तर्कसंग्रहदीपिका, पृ० 151
[39] पृथिवी सलिलं तेजः पवमानः (वायु) तमस्तथा ।
व्योम-काल-दिगात्मानो मनः शब्द इति क्रमात् ॥
एकादशविधं चैतत् कुमारिलमते मतम् ।- मा० मे०, पृ० 151
[40] लघुमञ्जूषा, पृ० 199-200
[41] (i) आश्रितत्वञ्चान्यत्र नित्यद्रव्येभ्यः । - प्र० पा० भा०, पृ० 7
(ii) आश्रितत्वं गुणत्वे हि न प्रयोजकमिष्यते ।
षण्णामपि पदार्थानामाश्रितत्वस्य संभवात्
दिक्कालपरमाण्वादि नित्यद्रव्यातिरेकिनः ।
आश्रिताः षडपीष्यन्ते पदार्था कणभोजिना ॥ - न्यायमञ्जरी, पृ० 210
[42] साक्षादिन्द्रियसम्बन्धवेद्यत्वं हि यावत्प्रसक्तपारिशेष्याद्वा निश्चीयते एकदेशपारिशेष्याद्वा ? नाद्यः, तत एवाद्रव्यत्वनिरूपणे लिङ्गग्राहकमानबाधात् । नेतरः, कर्मत्वादेरप्रतिषेधे संयुक्तसमवायादिवेद्यत्वशंकायां हेतोरसिद्धापत्तिः । - न्यायलीलावती, पृ० 667-68
[43] अनुकूलवातनिमित्तकारणकाः । - तर्कभाषा, पृ० 267; न्यायकन्दली, पृ० 695
[44] Mishra, Umesh : Physical Theory of Sound, AUS, Vol.2, p. 286.

**(घ)** विभुत्वाच्च शब्दो द्रव्यमिति युक्तिरपि सदोषा एव – शब्दो विभुपदार्थः चेत्तर्हि श्रोत्रेन्द्रियेण तस्य ग्रहणं न सम्भाव्यते; यतोहि श्रोत्रेन्द्रियमपि आकाशस्वरूपत्वात् विभुरेव। द्वयोश्च विभुपदार्थयोः परस्परसंयोगः केनापि प्रकारेण न सम्भवति संयोगाभावे च श्रोत्रेण शब्दस्य ग्रहणं कथमपि स्वीकर्तुं न शक्यते इत्यतः शब्दो न द्रव्यमिति वैशेषिकसिद्धान्तः[45] । महर्षिकणादोऽपि स्वयं शब्दस्य द्रव्यत्वं निराकुर्वन्नाह- किमपि कार्यद्रव्यम् एकद्रव्यसमवायिकारणकं न भवति अपितु तदनेकद्रव्यसमवायिकारणकमेव । तद्यथा- घटः द्वयोः कपालयोः पटश्चानेकतन्तुष्वेव समवेतो लक्ष्यते। अतः घटपटयोः समवायिकारणम्, अनेकद्रव्यसमवायिकारणकमेव विद्यते न तु एकद्रव्यसमवायिकारणकम्। किन्तु शब्दस्य समवायिकारणकमाकाशमेकमेव एतस्मादेकद्रव्यसमवायिकारणत्वाद् शब्दो न द्रव्यम्[46] अपितु गुण एव ।

**शब्दस्य कर्मत्वनिरासः**-एकद्रव्यसमवायिकारणत्वं शब्दस्य गुणत्वे हेतुश्चेत् कर्मणः अप्येकद्रव्यसमवायिकारणत्वाच्छब्दस्य कर्मत्वं स्यादित्येतां शङ्कां समादधता महर्षिकणादेनोक्तम्- 'शब्दः कर्म न भवितुं शक्नोति यतोहि शब्दस्य श्रावणप्रत्यक्षं भवति कर्मणस्तु चाक्षुषमेव। अतः चक्षुभिन्नश्रोत्रेन्द्रियप्रत्यक्षत्वात्कर्मत्वमसिद्धम्। लोके उत्क्षेपणादिकर्माणि चक्षुरिन्द्रियेणैव गृह्यन्ते किन्तु शब्दग्रहणे चक्षुरसिद्धा तस्य ग्रहणं तु खलु श्रोत्रेणैव भवति नान्येन। एतस्मादचाक्षुषत्वात्कर्मवैधर्म्याच्चायं शब्दो न कर्म इति'[47] । अपि च केनापि उत्क्षेपणादिकर्मवदाशुतरविनाशित्वं (क्षणिकत्वम्) शब्दस्यापि दृष्टे सति तस्य कर्मत्वं परिशङ्क्यते चेत्तत्राप्यदोष एव- आशुतरविनाशित्वं तु शब्दस्य गुणत्वेऽपि सम्भवति कर्मसाधर्म्यान्न तु कर्मत्वादिति भावः[48] । यथा द्वित्वादयः संख्याः, आत्मज्ञानम्, सुखदुःखेत्यादयो गुणाः क्षणिकाः तथैव शब्दस्यापि क्षणिकत्वे गुणत्वमुचितम्। वस्तुतस्तु आशुतरविनाशित्वं (क्षणिकत्वम्) कर्मणां व्याप्यधर्मः नास्ति- यत्र-यत्र कर्मत्वं तत्र-तत्राशुतरविनाशित्वमिति नियमाभावात् । अतः कर्मसाधर्म्येऽपि शब्दस्य कर्मत्वपरिहारः[49] ।

**शब्दस्य सामान्यविशेष-समवायत्वनिरासः**- वैशेषिकसूत्रविवृत्तिव्याख्यायां जयनारायणतर्कपञ्चाननेन- 'शब्दो शब्दत्वजातिमान् किन्तु सामान्यविशेषसमवायानां जातिर्न विद्यते'[50] इति शब्दस्य सामान्य-विशेष-समवायत्वपरिहारोऽपि क्रियते[51] ।

**शब्दस्याभावत्वनिरासः**-शब्दत्वजातित्वादेव यद्यपि शब्दस्य अभावत्वं परिह्रियते तथापि पद्मनाभमिश्रेण विध्यात्मकत्वादप्रतियोगित्वाच्चास्य अभावत्वं निराक्रियते[52] ।

---

45 वैशेषिक दर्शन में पदार्थ-निरूपण, पृ० 128

46 एकद्रव्यत्वान्न द्रव्यम । - वै० सू० 2.2.23 तत्रैव च- (i) द्रव्यञ्च किमप्येकद्रव्यसमवायिकारणकं न भवतीति द्रव्यवैधर्म्यान्नायं शब्दो द्रव्यमित्यर्थः । - वै० सू० उप० 2.2.23, पृ० 183
(ii) द्रव्यं कार्यद्रव्यं नैके द्रव्ये समवैति किन्त्वनेकेषु, यथा वस्त्रं नैकं तन्तुं समवैति न ह्येकस्मात् तन्तोर्वस्त्रं सम्पद्यते बहुभ्य एव सम्पद्यते । - वै० द० ब्र० भा०, पृ० 36

47 नापि कर्माचाक्षुषत्वात् । - वै० सू० 2.2.24 तत्रैव च- शब्दत्वं न कर्मवृत्ति चाक्षुषप्रत्यक्षावृत्तिजातित्वात् रसत्वादिवदिति भावः । - वै० सू० उप० 2.2.24, पृ० 183

48 गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम् । - वै० सू० 2.2.25

49 वै० सू० उप० 2.2.25

50 सामान्यादिचतुष्टये जातिर्नास्ति । - तर्कसंग्रहदीपिका, पृ० 25

51 विवृत्तिः 2.2.25

52 नाप्यभावो निःप्रतियोगित्वात् । - सेतुः (प्र० पा० भा०), पृ० 317

**शब्दस्य गुणत्वसिद्धिः-** उपर्युक्तपर्यालोचनेन षण्णामपि द्रव्य-कर्म-सामान्य-विशेषसमवायाभावानामसिद्धे सति परिशेषानुमानेन शब्दस्य गुणत्वमङ्गीक्रियते[53] । अपि च शब्दस्य गुणत्वसिद्धावपि गुणानां द्रव्याश्रितत्वाद् एतत्तु अनिश्चितमेव यत्पृथिव्यादिषु नवद्रव्येषु किं तस्य कारणम् ? यतोहि पृथिव्यादिकार्यद्रव्येषु ये रूपादयो विशेषगुणास्ते कारणगुणपूर्वकाः दृष्टाः[54]। तद्यथा शुक्लतन्तुष्वेव शुक्लस्य पटस्योत्पत्तिः भवति नान्यत्र । शब्दोऽपि विशेषगुणः[55]। अतः किं तत्कार्यद्रव्यम् ? यत्र कारणगुणपूर्वकः शब्दः स्यात् किं वा शब्दस्य समवायिकारणमिति जिज्ञासायां महर्षिकणादेन द्रव्याणामेकैकशः परीक्षा क्रियते-

**शब्दः स्पर्शवतामगुणः-**स्पर्शवतामगुणत्वे वैशेषिकैः शब्दस्य त्रीणि कारणानि ज्ञाप्यन्ते- अकारणगुणपूर्वकत्वम्, अयावद्द्रव्यभावित्वम्, आश्रयादन्यत्रोपलब्धत्वञ्च[56] इति ।

**शब्दस्याकारणगुणपूर्वकत्वम्-**पृथिव्यादीनां चतुर्णां कार्यद्रव्याणां ये रूपरसादयो विशेषगुणाः, ते कारणगुणपूर्वका एव गृह्यन्ते यथा- तन्तुकपालादिषु कारणेषु ये रूपरसाद्यनुभूयन्ते, त एव रूपरसादयः पटघटादिषु कार्येष्वपि उपलभ्यन्ते[57] । परं शब्दस्तु न तथा यदि कारणगुणपूर्वकः शब्दस्स्यात्तर्हि वीणावेणुमृदङ्गशङ्खपटहाद्यवयवेषु यः शब्द उपलब्धः स एव वीणाद्यवयविषु उपलभ्येत। न चैवम् प्रत्युत निःशब्दैरेव वीणाद्यवयवैः वीणाद्यवयवीनामुत्पत्तिः दृश्यते किन्तु निरूपैः तन्तुकपालादिभिः पटघटादीनामुत्पत्तिर्न ज्ञायते । अतः अकारणगुणपूर्वकत्वात् शब्दः स्पर्शवतां (पृथिव्यप्तेजोवायूनाम्) गुणभावो न भजत इति[58] ।

**शब्दस्यायावद्द्रव्यभावित्वम्-** पृथिव्यादीनां स्पर्शवतां ये रूपरसादयो गुणाः ते यावद्द्रव्यभाविनः वैचित्र्येण नानुभूयन्ते किन्तु शब्दस्तु अयावद्द्रव्यभावी तार-तारतर-मन्द-मन्दतररूपेण वैचित्र्येणोपलभ्यते । यद्यपि वीणायाः यो रूपगुणः सः यावद्द्रव्यभावी सर्वेषु च वीणावयवेषु समानभावेन प्राप्यते । अनेन स्पष्टं यद्वीणायाः गुणः रूप एव न तु शब्द इति ।

**शब्दस्याश्रयादन्यत्रोपलब्धत्वम्-**यदि शब्दः स्पर्शवतां विशेषगुणः स्यात् तर्हि यैः शङ्खवीणादिभिः शब्द उत्पद्यते, त एव शङ्खादयो शब्दस्याश्रयिणः स्वीकर्तव्याः परन्तु शब्दस्तु तेभ्यः अन्यत्र कर्णशष्कुलीप्रदेशे समुपलभ्यते । न चान्यगुणस्यान्यत्र ग्रहणमस्तीति नियमान्न स्पर्शवद्विशेषगुणः शब्द इति[59] ।

**शब्दो नात्मगुणः-** शब्द आत्मनि असमवेतत्वे सति अन्यत्र समवेतत्वात् नात्मगुणः[60] । शब्दो यद्यात्मगुणो स्यात्तर्हि- अहं सुखी, अहं दुःखी, अहं यते, अहं जानामि इत्याद्यात्मानुभववत्- अहं वाद्ये, अहं शब्दवानिति अनुभवः स्यात् किन्तु अनुभवस्तु

---

53 परिशेषस्तु प्रसक्तप्रतिषेधेऽन्यत्र प्रतिषेधात् । - व्योमवती, पृ० 329
तथा- प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययः परिशेषः इत्यर्थः । तदेव, पादटिप्पणी

54 कारणगुणपूर्वकः कार्यगुणो दृष्टः । - वै० सू० 2.1.24

55 (i) रूपरसगन्धस्पर्शस्नेहसांसिद्धिकद्रवत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा वैशेषिकगुणाः।
सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वगुरुत्वनैमित्तिकद्रवत्ववेगाः सामान्यगुणाः । - प्र० पा० भा०, पृ० 60
(ii) बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेह सांसिद्धिको द्रवः ।
अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः ॥
संख्यादिरपरत्वान्तो द्रवोऽसांसिसिद्धिकस्तथा ।
गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्तिताः ।। - भा० परि०, कारिका 90-92

56 शब्दः प्रत्यक्षत्वे सत्यकारणगुणपूर्वकत्वादयावद्द्रव्यभावित्वादाश्रयादन्यत्रोपलब्धेश्च न स्पर्शवद्विशेषगुणः । - प्र० पा० भा०, पृ० 37

57 कारणगुणपूर्वकः कार्यगुणो दृष्टः । - वै० सू० 2.1.24

58 कार्यान्तरप्रादुर्भावाच्च शब्दः स्पर्शवतामगुणः । - वै० सू० 2.1.25

59 न्या० क०, पृ० 144-146; व्योम०, पृ० 322-328; सूक्तिः, पृ० 310-311; सेतु, पृ० 317- 319

60 परत्र समवायात् प्रत्यक्षत्वाच्च नात्मगुणो न मनोगुण । - वै० सू०, 2.1.26

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-44 , YEAR 11, VOL -I, DOI-30-01-2021

Since 2010

शङ्खः पूर्य्यते, वीणा वाद्यते इति भवति । अतः शब्दो नात्मगुणः[61] । तथा च सुख-दुःख-ज्ञानेत्यादयो आत्मगुणाः बाह्येन्द्रियैः न गृह्यन्ते परन्तु शब्दस्य बहिरिन्द्रिय-श्रोत्रग्राह्यत्वं स्पष्टमेव, इत्यतोऽपि शब्दो नात्मगुणः[62] ।

**न मनोगुणः शब्दः, नापि च दिक्कालयोः**-अमनोगुणत्वेऽपि हेतुमाह महर्षिकणादः- **प्रत्यक्षत्वादिति**[63] । शब्दस्य श्रोत्रेन्द्रियप्रत्यक्षं भवति यदा च अणुपरिमाणवतो मनसः[64] विशेषगुणप्रत्यक्षशक्तिरसम्भवा यतोहि विशेषगुणप्रत्यक्षत्वे द्रव्यस्य महत्परिमाणवत्त्वमावश्यकम् मनस्तु अणुपरिमाणवदिति शब्दो न मनोगुण इति। शङ्करमिश्रः प्रत्यक्षत्वादिति अनेनैव हेतुना दिक्कालयोरपि गुणत्वं शब्दस्य प्रतिषिद्धमिति सूचयति[65] । आचार्यप्रशस्तपादोऽपि श्रोत्रग्राह्यत्वात् विशेषगुणत्वाच्च शब्दो न दिक्कालमनसां गुण इति कणादाभिमतमेव स्पष्टयति[66] । व्योमवतीकारस्तु- यो यो विशेषगुणः सः सः दिक्कालमनसां गुणो न भवितुं शक्नोति । शब्दोऽपि विशेषगुणः एतस्माद्विशेषगुणत्वाच्छब्दो न दिक्कालमनसां गुण इति अनुमानयुक्त्यैव शब्दस्य दिक्कालमनोगुणत्वमपनयति[67] ।

**परिशेषतः शब्दोऽम्बरगुणः**-उपर्युक्तविधिना पृथिव्यप्तेजोवायुकालदिगात्ममनसामष्टानां द्रव्याणां शब्दगुणाश्रयत्वे असिद्धे सति परिशेषादाकाश एव शब्दस्याश्रय इति निश्चीयते[68] यतोहि शब्दो गुणः, गुणश्च द्रव्यमन्तरेण न सम्भवति[69], द्रव्याणि च नवैव[70], तत्रापि पृथिव्यादिष्वष्टसु शब्दाश्रयत्वं न विद्यते। अतः परिशेषाद् शब्दस्याश्रयरूपेण आकाशसिद्धिर्भवतीति[71]। उदयनाचार्योऽपि शब्दस्य गुणवत्तया एव आकाशसिद्धिं प्रतिष्ठापयति[72]। व्योमवतीकारेणापि आकाशसिद्धौ एतदेवानुमानमुपन्यस्तम्[73]। इत्थं पर्यालोचनेन शब्द आकाशस्य विशेषगुण इति वैशेषिकसिद्धान्तः स्थापितो भवति[74] ।

---

61 वै० सू० उप०, पृ० 150; वै० द० ब्र० भा०, पृ० 27; सु० वै० सू० वृ०, पृ० 34

62 बाह्येन्द्रियप्रत्यक्षत्वादात्मान्तरग्राह्यत्वादात्मन्यसमवायादहङ्कारेण विभक्तग्रहणाच्च नात्मगुणः । - प्र० पा० भा०, पृ० 37

63 वै० सू० 2.1.26

64 तदभावादणु मनः । - वै० सू० 7.1.23; न्या० क०, पृ० 223

65 वै० सू० उप० 2.1.26, पृ० 150

66 श्रोत्रग्राह्यत्वाद् वैशेषिकगुणभावाच्च न दिक्कालमनसाम् । - प्र० पा० भा०, पृ० 37

67 तथा च शब्दः, दिक्कालमनसां गुणो न भवति, विशेषगुणत्वात् । यो यो विशेषगुणः स स दिक्कालमनसां गुणो न भवति, यथा रूपादिः, तथा चायं विशेषगुणः, तस्मान्न दिक्कालमनसां गुणः शब्दः इति । - व्योम०, प्रथमो भागः, पृ० 116

68 (i) परिशेषाल्लिङ्गमाकाशस्य । - वै० सू० 2.1.27

(ii) परिशेषाद् गुणो भूत्वा आकाशस्याधिगमे लिङ्गम् । - प्र० पा० भा०, पृ० 39

69 (i) द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम् । - वै० सू० 1.1.16,

(ii) अथ द्रव्याश्रिताः ज्ञेयाः निर्गुणाः निष्क्रिया गुणाः । - भा० परि०, कारिका 86

70 (i) पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि । - वै० सू० 1.1.5

(ii) तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि सामान्यविशेषसंज्ञयोक्तानि नवैवेति । तद्व्यतिरेकेणान्यस्य संज्ञानभिधानात् । - प्र० पा० भा०, पृ० 3

71 गुणः शब्दः, गुणश्च गुणिना विना न भवति, न चैष पृथिव्यादीनां गुणः, द्रव्यान्तरञ्च नास्ति, तस्माद्यस्यायं गुणस्तदाकाशमिति परिशेषादाकाशस्याधिगमे प्रतिपत्तौ लिङ्गमित्यर्थनिर्देशः । - न्या० क०, पृ० 150

72 लक्षणावली, पृ० 12; किरणावली, पृ० 110

73 व्योम०, प्रथमो भागः, पृ० 117

74 (i) आकाशस्य तु विज्ञेयो शब्दो वैशेषिको गुणः । - भा० परि०, कारिका 44

(ii) सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते । - भा० परि०, कारिका 165

 

# सन्दर्भग्रन्थसूची

1. वैशेषिकसूत्रम्, कणादः, सं० नारायण मिश्रः, चौखम्बा संस्कृत सीरीज़, वाराणसी, 1966.
2. वैशेषिकसूत्रोपस्कारः, शंकर मिश्रः, सं० ढुण्ढिराज शास्त्री, काशी संस्कृत ग्रन्थमाला, वाराणसी, 1969.
3. वैशेषिकदर्शनं 'रसायनाख्यव्याख्योपेतम्', श्रीवीरराघवाचार्यः, मद्रासः, 1958.
4. वैशेषिकसूत्रवैदिकवृत्तिः, पण्डितस्वामिहरिप्रसादपरमहंसः, निर्णयसागर, मुम्बई, 1961.
5. वैशेषिकदर्शनं ब्रह्ममुनिभाष्योपेतम्, स्वामी ब्रह्ममुनिः परिव्राजको विद्यामार्तण्डः, आर्यकुमार महासभा आत्माराम रोड, बडौदा, 1995.
6. सुगमा वैशेषिकसूत्रवृत्तिः, देशिकतिरुमलताताचार्यः, सं० वि० श्री० रङ्गनाथाचार्यः, गंगानाथझाकेन्द्रियसंस्कृतविद्यापीठम्, प्रयागः, 1979.
7. प्रशस्तपादभाष्यम्, (सूक्ति-सेतु-व्योमवतीटीकाभिः सहितम्), सं० गोपिनाथकविराजः ढुण्ढिराजशास्त्री च, चौखम्बा अमरभारती प्रकाशन, वाराणसी, 1983.
8. प्रशस्तपादभाष्यम् ( न्यायकन्दली टीका ), प्रशस्तपादः, व्या० पण्डित श्री दुर्गाधर झा शर्मा, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालय, वाराणसी, 1997.
9. व्योमवती, व्योमशिवाचार्यः, सं० गोपीनाथ कविराजः, ढुण्ढिराज शास्त्री, चौखम्बा संस्कृत सीरीज ग्रन्थसंख्या 61, वाराणसी, 1930.
10. किरणावली, उदयनाचार्यः, सं० विन्ध्येश्वरी प्रसाद द्विवेदी, बनारस संस्कृत सीरीज, सं. 9, वाराणसी, 1897.
11. लक्षणावली, उदयनाचार्यः, सं० शशिनाथ झा, मिथिला विद्यापीठ, दरभंगा, 1963.
12. न्यायकन्दली, श्रीधराचार्यः, सं० दुर्गाधर झा, गंगानाथ झा ग्रन्थमाला सं. 1, वाराणसी, 1963.
13. न्यायलीलावती, श्रीवल्लभाचार्यः, सं० हरिहर शास्त्री, चौखम्बा संस्कृत सीरीज, सं. 355, बनारस, 1927.
14. भाषापरिच्छेद (न्यायसिद्धान्तमुक्तावलीसहित), विश्वनाथः, सं० हरिराम शुक्ल शास्त्री, काशी संस्कृत सीरीज, 6, वाराणसी, 1972.
15. तर्कभाषा, केशवमिश्रः, व्या० डॉ० श्रीनिवास शास्त्री, साहित्य भण्डार, सुभाष बाजार, मेरठ, 1999.
16. तर्कसङ्ग्रहः 'दीपिका सहितः', अन्नम्भट्टः व्याख्या.- कांशीराम एवं सन्ध्या राठौर, मोतीलाल बनारसीदास, दिल्ली, 2007.
17. पदार्थदीपिका (हस्तलिपि), कौण्डभट्टः, सरस्वतीभवनपुस्तकालयः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी.
18. न्यायमञ्जरी (भागद्वयम्), जयन्तभट्टः, सं० सूर्यनारायणशुक्लः, चौखम्बा संस्कृत सीरीज, वाराणसी, 1971.
19. वैशेषिक दर्शन में पदार्थनिरूपण, प्रो० शशिप्रभा कुमार, प्रकाशन विभाग, दिल्ली विश्वविद्यालय, दिल्ली, 1992.
20. Mishra, Umesh, NyĀya-Vaiśeṣika Conception of Matter in Indian Philosophy, Bharatiya Kala Prakashan, Delhi-35, 2006 (Reprint).

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-44 , YEAR 11, VOL -I, DOI-30-01-2021 | Since 2010

# अमूर्त "व्रज" से मूर्त ब्रज की यात्रा

## (वेद से अर्वाचीन लोक तक)

**डा. मीनाक्षी**
खरगोन, मध्यप्रदेश

**SID-** 234518486

**Received on-**-1/4/2021 22:48:21 | **Accepted on-** 26th January, 2021

**प्रमुख शब्द-** व्रज, ब्रज, ऋग्वेद, अमूर्त, काल

**शोध-सार**

हर शब्द की एक अपनी यात्रा होती है जिसके द्वारा वह कभी स्वयं को व्यापक करता है अथवा स्वयं को सीमित। कभी-कभी शब्द भिन्न अर्थ में भी प्रयोग होने लगते हैं इसी श्रंखला में व्रज शब्द जो प्राचीन काल में अमूर्त रूप को धारण करता था मध्यकाल तक आते-आते मूर्त स्थान का वाचक हो जाता है। समस्त भक्ति आंदोलन इस शब्द के मूर्तिमान होने पर सुदृढ़ आधार पा जाता है। इसी ब्रज शब्द की यात्रा को ऋग्वेद से लेकर स्तोत्र साहित्य तक भिन्न-भिन्न अर्थों को धारण करते हुए स्थान वाचक के रूप में रूढ़ होते हुए इस शोध पत्र में प्रस्तुत किया गया है।

**ABSTRACT**

Each word has its own journey by which it ever broadens or limits itself. Sometimes words begin to be used in different ways in this series, the word ' Vraj ', which holds an abstract form in ancient times, becomes a signifier of the tangible place by the middle of the period. The entire bhakti movement gets a strong base when this word is idolised. This research paper, while holding different meanings from Rigveda to ode literature, to the journey of the same Braj.

अमूर्त "व्रज" से मूर्त ब्रज की यात्रा एक शब्द यात्रा है जो अमूर्त तत्वों से होते हुए भावों की बहुलता से तथा विभिन्न आध्यात्मिक अनुभूतियों द्वारा अभिषिक्त होकर स्वयं की मूर्त रूप में उपस्थापना करता है। ब्रजभूमि का प्राण है श्रीराधाकृष्ण तत्व, इसी लिए यह भूमि सदैव से ही भारतीय साधकों के लिए आकर्षण का केन्द्र रही है ! ब्रज भारतीय लोकमानस का ललित भाव है ! संस्कृत का शब्द ' व्रज ' ऋग्वेदकालीन है जिस का अर्थ है ' गायों का खिरक ' या पशुओं का समूह, जो गतिमान और घुमन्तु हो ! कहीं – कहीं पशुओं के चरागाह के लिए भी यह शब्द प्रयुक्त हुआ है और चौथी सदी ईसा पूर्व

के लगभग रचे कौटिल्य कृत अर्थशास्त्र के युग में भी ' ब्रज ' शब्द इन्हीं अर्थों में प्रयोग हो रहा था, पर आज हम उत्तर भारत में जिस क्षेत्र को ' ब्रज मण्डल ' के नाम से पहचानते हैं , वह भू-भाग प्राचीन भारत में ' शूरसेन जनपद ' कहलाता था । ब्रज शब्द की विकास यात्रा को हम निम्न बिंदुओं में देख सकते हैं

1. **वैदिक वाङ्मय में '"व्रज"' शब्द का अर्थ**
2. **महाभारत तथा स्मृति ग्रंथों में '"व्रज"' शब्द का अर्थ**
3. **पौराणिक साहित्य में '"व्रज"' शब्द का अर्थ**
4. **संस्कृत साहित्य में '"व्रज"' शब्द का अर्थ**
5. **अन्य स्तोत्र साहित्य में '"व्रज"' शब्द का अर्थ**

**'"व्रज"' शब्द का अर्थ कोशों के अनुसार** "व्रज" शब्द संस्कृत की ""व्रज" गतौ" धातु से निष्पन्न होता है- **"गोचर संचरेति**[75]**"** इस प्रकार यह गति सूचक है। **'"व्रज"'** धातु से **घञ् प्रत्यय** बनाकर पुल्लिंग शब्द "व्रज" गमनार्थक है। अमरकोश के अनुसार समूह का वाचक है-

**समूहे निवहव्यूहसन्दोहविसरव्रजाः ।**
**स्तोमौघनिकरव्रातवारसङ्घातसञ्चया ।।**[76]

वही अमरकोश में "व्रज" को गवां स्थानम् / गोस्थानक के रूप में भी कहा गया साथ ही मार्ग के पर्याय के रूप में भी स्वीकार किया गया है। **वैजयंती कोश** के अनुसार - **व्रजः स्याद्गोकुलं गोष्ठम् । मेदिनी कोश** के अनुसार- **निरुद्ध वीवधासारप्रसारा गा इव व्रजम् ।** इस प्रकार हम '"व्रज"' को विभिन्न कोषों में और विभिन्न व्युत्पत्तियों के अनुसार समूह, मार्ग, गति, गोसमूह, वनसमूह, इत्यादि के रूप में देखते हैं।

❖ **वैदिक साहित्य में "व्रज" शब्द**

ऋग्वेद में पशुओं की चरागाह, बाड़ा, या समूह के रूप में ब्रज शब्द का प्रयोग मिलता है यथा-

**गवामयं व्रजं वृथि कृणुष्व राधौ अद्रिवः ।**[77]
**अभि प्सुरः प्रुषायति व्रजं न आ प्रुषायति**[78]

पूषन् सूक्त में कहा गया है कि वह रूपवान् पूषा कृपा कर जल वृष्टि करता है और हमारे गोष्ठ में भी जलवृष्टि करता है।

**अति विश्वाः परिष्ठाः स्तेन इव व्रजमक्रमुः ।**[79]

जैसे चोर गोष्ठ पर आक्रमण करता है वैसे ही औषधियां रोग पर आक्रमण करती है यहां पशुधन के रूप में "व्रज" को लिया गया है।

**यं त्वा जनासो अभि सञ्चरति गांव उष्णमिव व्रजं यविष्ठ ।**[80]

---

[75] पाणिनिसूत्र 3/3 /119
[76] अमरकोश 2/5/39/1/6
[77] ऋ. 1/10/7
[78] ऋ 10/26/3
[79] ऋ.10/97/10
[80] ऋ.10/111/2

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-44 , YEAR 11, VOL -I, DOI-30-01-2021 Since 2010

अग्नि से प्रार्थना की जाती है कि जिस प्रकार गाय शीत पीड़ित होकर उष्ण गोष्ठ की ओर गमन करती है उसी प्रकार हम भी तुम्हारी ओर गमन करते हैं। कहीं-कहीं यह शब्द जलाशय के अर्थ में भी आया है[81]

**छन्दांसि वै गोस्थान:**[82]

यहां पर भी "व्रज" गोस्थान के रूप में प्रयुक्त हुआ है। अथर्ववेद में भी पशु समूह या पशुओं के बाड़े के रूप में यह शब्द प्रयुक्त हुआ है।

**अयं अस्मदीयो व्रज:**[83]

इसके अतिरिक्त वैदिक सूक्त ओं में कई स्थलों पर "व्रज" शब्द आया है क्योंकि पशुपालन तथा यज्ञ कर्म प्रमुख कर्म थे उसमें भी गायों की प्रमुखता थी सलमान पणि संवाद ऋग्वेद काइसका उपयुक्त उदाहरण है यहां तक व्रत शब्द को समूह चरागाह के रूप में आया है जो चलित रूप है गतिमान है परंतु **तैत्तिरीय ब्राह्मण**[84] **में** निर्देशित करता है कि "व्रज" को अश्वस्थ लकड़ी से बनाया गया है बड़े से द्वार के साथ जिससे गायों की चोरी ना हो सके यहां स्थाई गोष्ठ के रूप में "व्रज" शब्द आता है मैत्रायणी संहिता में इसका **२,२८३ वर्ग** आकार दिया गया है।[85]

इसके साथ ही "व्रज" स्थान रूप को प्राप्त कर लेता है और अपने गति के अर्थ को आंशिक रूप में छोड़ देता है उपनिषदों में भी यह लाक्षणिक प्रयोग देखने को मिलता है।

- **महाभारत तथा स्मृति ग्रंथ**

महाभारत में तथा स्मृति ग्रंथों में यही "व्रज" शब्द उन्हीं अर्थों को द्योतित करता है जिन अर्थों में हम इसे वैदिक काल में जानते हैं जैसे गायों का झुंड मार्ग वन जलाशय गो स्थान इत्यादि गतिशीलता थोड़ी कम जरूर हुई थी

**आसीनं गो व्रजे तस्मिन्वहन्तं शवपन्नगम्**[86]

**न मूत्रं पथि कुर्वीत न भस्मानि गो व्रजे।**[87]

**गो महिषजाविकंखरोष्ट्रमश्वाश्वतराश्च व्रजः।**[88]

- **पुराण**

यहां तक अर्थात् वेद उपनिषद तथा स्मृति ग्रंथों तक जो जानवरों का समूह जलाशय को समूह मार्ग को स्थान इत्यादि विविध रूपों में जो "व्रज" शब्द ध्वनित होता था वह आगे जाकर वही शब्द पुराणों में सभी अर्थों को समाविष्ट कर लेता है। पुराणों में इसी "व्रज" की गोचारण भूमि के नायक श्रीकृष्ण अधिष्ठाता बनते हैं और कृष्णावतार की कथा के साथ-साथ "व्रज" का अमूर्त आख्यान हमें पुराणों में स्पष्ट रूप से दृष्टिगोचर होता है। जिसकी विहंगम झलकी हमें शील भट्टनारायण

---

81 वाजसनेय संहिता 10. 4 तै. ब्राह्मण 1.8. 11. 1

82 तै. ब्रा.3/2/9/3

83 अथर्ववेद 4/38/7

84 3/8 /12 /12

85 मै. सं. २/६/७

86 महा.1/41/15

87 मनु.4/45

88 कौ. अ.2/6/24/7


CONTACT US- JAHNAVISANSKRITJOURNAL@GMAIL.COM WEBSITE-JAHNAVISANSKRITEJOURNAL.IN

 Since 2010

गोस्वामी विरचित **ब्रजभक्तिविलास** में 1588 ईसवी के आसपास प्राप्त होती है। ग्रंथ आरंभ में ही बताया गया है कि इसमें पुराणों मत्स्य-पुराण, पद्म-पुराण, विष्णु-पुराण, कूर्म-पुराण, वराह-पुराण, ब्रह्मांड-पुराण, नारद-पुराण इत्यादि में वर्णित 12 वन जो कि चौरासी कोस परिमित ऊंचा स्थान है उसे ही ब्रजमंडल कहा गया है।

**व्रजमण्डलभूगोलं शेषनागफणं वरं**
**कुमुदाख्यं महाश्रेष्ठं सर्वेषां मध्यसंस्थितम्।**
**....चतुरष्टकक्रोशेन परिपूर्णविराजितम्।**[89]

पद्मपुराण के अनुसार वन उपवन प्रतिवन और अधिक वन 48 संख्या में है तथा चौरासी कोस परिसीमा में है ।
अब यहां "व्रज" शब्द वन के रूप में रोड होता गया जो गौ समूह मार्ग जलाशय चरागाह गोष्ठी सभी का सम्मिलित रूप था। श्रीमद्भागवत पुराण तो "व्रज" वंदना का गायन ही करता है। जिसका अनुगायन हमें संस्कृत हिन्दी ब्रजभाषा अवधी इत्यादि में सहज प्राप्त होता है ।इस समय अर्थात पौराणिक काल में ब्रज क्षेत्र वासी होता गया जो कृष्ण के गोपालन तथा गोचरण से संबंध तथा भागवत के दशम स्कंध के प्रथम अध्याय में परीक्षित का प्रश्न स्पष्ट रूप से किसी निश्चित प्रदेश का ही द्योतन करता है।

**कस्मान्मुकुन्दो भगवान् पितुर्गेहाद् व्रजं गतः।**[90]
**व्रजे वसन्किम् करो मधुपुर्या केशवः।**[91]

❖ **संस्कृत साहित्य**

संस्कृत साहित्य में इस पौराणिक ब्रजमंडल की गूंज हमें विविधताओं के साथ सुनाई देती है।संस्कृत साहित्य में सर्वप्रथम भास के नाटकों में हमें कृष्ण चरित प्राप्त होता है उसमें भी **"बाल चरित्"** श्रीमद्भागवत का साररूप ही है जिसमें **कृष्णबाललीला** तथा **कालियादेह** इत्यादि "व्रज" लीलाओं का वर्णन हमें प्राप्त होता है यहां "व्रज" शुद्ध स्थान वाचक शब्द माना गया है। **राघव यादव** एवं काव्य में एक ओर से रामचरित तो दूसरी ओर पड़ने पर कृष्णचरित पाठ होता है जिसमें "व्रज" वर्णन भी शामिल है।



1280 में जयदेवकृत **"गीतगोविंदम्"** रास पंचाध्यायी भागवत का सार ही है जो समस्त निकुंज लीला का वर्णन करता है। 1588 **में "भक्तिविलास"** जो श्रील नारायण भट्ट गोस्वामी द्वारा विरचित है जिसमें ब्रज के समस्त स्थलों का सूक्ष्मता से वर्णन किया गया है।

---

89 मत्स्यपुराण
90 भागवत्-10/1/8
91 भागवत्-10/1/9

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-44 , YEAR 11, VOL -I, DOI-30-01-2021 Since 2010

1500 ई में रूप गोस्वामी कृत **विदग्ध-माधव** दूत काव्य परंपरा में भी रूप गोस्वामी कृत **उद्धव दूत** तथा **हंस दूत ,उद्धव संदेश** इत्यादि काव्य में ब्रज का वर्णन है इन सभी में ब्रज स्थान वाचक ही है और स्थल भी अमूर्त से मूर्त की ओर प्रवृत्त हुए हैं और यहीं से पुराणों में वर्णित अमूर्त से मूर्त ब्रज की यात्रा प्रारंभ हो जाती है कई उपासक अनुभूति के दरवाजे खटखटा ते हुए उन उन स्थानों को ग्रहण करते और भक्ति रस का आनंद लेते। (आचार्य हरिदास जी)

❖ **संस्कृत स्तोत्र साहित्य**

संस्कृत की स्तोत्र साहित्य बृज की साकार मूर्तिमान स्वरूप का ही गुणगान करते हैं । शंकराचार्य, रामानुजाचार्य, रामानंदाचार्य ,वल्लभाचार्य, माधवाचार्य, निंबार्काचार्य, चैतन्यदेव इत्यादि अनेकानेक संतो द्वारा की जाने वाली वंदना संस्कृत साहित्य को निरंतर समृद्ध करती है। भक्ति आंदोलन के परिणाम स्वरूप संतो द्वारा प्रवाहित भक्ति ज्ञान धारा का प्रत्यक्ष लोक में करवा कर इस पृष्ठभूमि को आनंद की स्थली बना दिया । उन्होंने पुराणोक्त कृष्ण स्थलों का प्राकट्य कर सभी भक्तों को अमूर्त ब्रज से मूर्ति ब्रज का साक्षात्कार करवाया। इनकी भक्ति इतनी सांद्रित थी कि बाल गोपाल नेत्रों के समक्ष ब्रज लीला निकुंज लीला हंसते गाते लोगों के जीवन का अंग बनते चले गए और यहां के देवालय संस्कृति एक नए रूप में हवेली के स्वरूप में स्थापित हुई जहां पर श्री कृष्ण नर्तन करते हुए से दिखाई देने लगे।



## सन्दर्भग्रन्थसूची


- काव्यप्रकाशः, संस्कृत पुस्तक भाण्डार, कलिकाता, 2008
- कौटलीयार्थशास्त्रम्,आर.पी.कांगलो, मुम्बाई, 1966
- छान्दाग्योपनिषद्, पं0 श्रीराम शर्मा आचार्य, संस्कृति सस्थान, बरेली।
- तर्कसंग्रहः, हरिकृष्णनिबन्धभवनम्, 1960
- तैत्तिरीयारण्यकम्, आनन्दाश्रमसंस्कृतग्रन्थावली, 1967
- तैत्तिरीयोपनिषद्, पं0 श्रीराम शर्मा आचार्य, संस्कृति सस्थान, बरेली।
- तैत्तिरीयोपनिषद्, स्वामी प्रखर प्रज्ञानन्द सरस्वती, चैखम्भा संस्कृत सस्थान, वाराणसी।
- पूर्वमीमांसासूत्रम्-चौखम्बा संस्कृत सिरीज आफिस्, वाराणसी, 1916
- ब्रह्मसूत्रशांकरभाष्यम्, निर्णयसागरप्रेस्, मुम्बई, 1904
- मनुस्मृतिः, मोतिलाल बनारसीदास, वाराणसी, 1990
- याज्ञवल्क्यस्मृतिः(मिताक्षरासहिता) चौखम्बासंस्कृतप्रतिष्ठान, दिल्ली, 2005
Mahabharata is also known as the name of Mahayuddha. There are so many topics described in the Mahabharatata, as well as war technology. A detail description of arms is in Mahabharata as well as the descriptions of ethology and study. Vyus i.e. Vyoha i.e., ground strategy and Divyastra i.e., special type of weapons are also demonstrated in the Mahabharata. Camps and march of army and its troops are also depicted in the Mahabharata. Example – Kaurvas says – according ot Brihaspati, if the strength and enemy is one third or less, then and only then one should attack of fight the battle. But my army fur Akshauhini more than Pandavas. In toto, the strength of each army was eighteen Akshauhini. So, war is decided and inevitable. This article is base on the war technology described in the Mahabharata. War technology does means ground battle, but also describing the preparations, arms, training, chariot and horses. Training of Sarthi plays vital role as we got stories is Mahabharata. We know the Horse Power, which is come in use during 18th century, but it was also in use during Mahabharata period as Ashwa Shakti. Now a days there are arrangements in the army like, section, platoon, rifle, company, battalion etc, same as we see in Mahabharata, Gulma, Vahini, Pritna, Chamu, Anikani etc.

महाभारते बहुविधा: विषया: वर्णिता: सन्ति तथैव युद्धविज्ञानम् (War Technology) वर्णितम् अस्ति। एतस्मिन् विषये विस्तृतोल्लेख: अस्ति। शास्त्रस्य वर्णनम् अस्ति तु शस्त्रस्य वर्णनमपि अस्ति, व्यूढानां वर्णनानि सन्ति, दिव्यास्त्राणां वर्णनानि सन्ति। सैन्यव्यवस्थाया: वर्णनम् अपि अस्ति।कौरवाः बृहस्पतिवचनमुद्धन्तः निगदन्ति यत् यदि शत्रो: सैन्यबलं त्रिगुणतो न्यूनं वा अल्पमपि अस्ति तु निश्चयेन युद्धं कुर्यात्। परन्तु आस्माकं तु चत्वार: अक्षौहिण्या: सैन्यबलं अधिकम् अस्ति, अत: युद्धं निश्चितम्। कुरुक्षेत्रे सर्वमाहत्य अष्टादश अक्षौहिण्या: सेनाः आसन्।

बलं त्रिगुणतो हीनं योध्यं प्राह बृह्स्पति:।
परेभ्यस्त्रिगुणा चेयं मम राजन्ननीकिनी।। [311]

**सारथि-शिक्षणम्**

द्रोणाचार्यस्य मृत्यो: अनन्तरं कर्ण: कौरवपक्षस्य सेनापतिरूपेण अभिषिक्त:। शल्य: कर्णस्य सारथि: अभवत्। रथसंचालनस्य ज्ञानं तु आवश्यकं किन्तु इतोSपि सारथीनां कीदृशं ज्ञानम् आवश्यकम्? समं विषमं च अवस्थाया: ज्ञानं, रथिनस्य प्राबल्यं-दौर्बल्यं च, रथिना सह अश्वानामपि श्रमं कष्टं च, रथे अस्त्रादे: उपलब्धतां, जय-पराजयसूचकपशुपक्षीनां रुतम्, भार: अतिभार: च, शल्य-चिकित्सा, अस्त्रप्रयोग:, शुभाशुभ-निमित्त आकलनम् इति। एतावत् सर्वं ज्ञानं आवश्यकं सारथे: कृते। अत्र शल्य-चिकित्साज्ञानस्य अपि उल्लेख: आगत:। सारथीनां कृते शल्य-चिकित्साया: ज्ञानम् आवश्यकम् आसीत्। अर्थात् एतादृशं प्रगत- प्रशिक्षणं सर्वेषांकृते व्यापकरूपेण व्यवहारे आसन्।

समं च विषमं चैव रथिनश्च बलाबलम्।
श्रमः खेदश्च सततं हयानां रथिना सह।।
आयुधस्य परिज्ञानं रुतं च मृगपक्षिणाम्।
भारश्चाप्यतिभारश्च शल्यानां च प्रतिक्रिया।।
अस्त्रयोगश्च युद्धं च निमित्तानि तथैव च।
सर्वमेतन्मया ज्ञेयं रथस्यास्य कुटुम्बिना।।
अतस्त्वां कथये कर्ण निदर्शनमिदं पुनः।[312]

**युद्धकौशलम्**

महाभारतं तु महायुद्धस्य पर्यायवाची रूपेण जना: स्मरन्ति वदन्ति च। अष्टादशदिनानि यावत् महासंग्रामे अष्टादश अक्षौहिणी सैनिका: हता:। संग्रामक्षेत्रे अर्थात् धर्मक्षेत्रे कुरुक्षेत्रे सेनयो: विविध व्यूहरचना महाभारते वर्णिता अस्ति सा युद्धकौशलस्य अद्भुतमुदाहरणम् अस्ति।

अद्यत्वे अपि सेनाया: संरचना भवति। अधिकारीगणानां सैनिकानां च भिन्न-भिन्न समूहा: वर्तन्ते। तेषां भिन्न-भिन्न पदानां नामानि भवन्ति। उदाहरणार्थ – “'सेक्शन, प्लाटून, रायफल, कम्पनी, बटालियन अथवा रेजीमेंट, ब्रिगेड, डिविजन, आर्मीकॉर्प्स, आर्मी कमांड ” इत्यादय:।

महाभारते सैनिकानां समूहस्य संरचनाया: च वर्णनम् अस्ति। एक पत्ते: अन्तर्गत: एक: रथ:, एक: गज:, पञ्च पदातय:, त्रय: अश्वा: च भवन्ति स्म। अनन्तरं पत्तित्रयं योजयित्वा एकं सेनामुखं भवति स्म। पुनश्च गुल्म:, वाहिनी, पृतना, चमू, अनीकिनी इत्यादय: अक्षौहिणी पर्यन्तं गण्यन्ते।

---

[311] उद्योग अध्याय-55, श्लो56

[312] कर्ण अ.41, श्लो.7-9

[A First International Electronic Peer-reviewed Quarterly Refereed-
**UGC Approved** (41039), **SCOPUS** Registered Sanskrit Tri-lingual Journal with **Journal Factor**]
**URL-** www.jahnavisanskritejournal.in **ISSN**-0976-8645 **ISSUE**-44 , **YEAR** 11, **VOL** -I, DOI-30-01-2021 | Since 2010

एको रथो गजश्चैको नरा: पञ्च पदातय:
त्रयश्च तुरगास्तेज्ञै: पत्तिरित्यभिधीयते।। [313]
पत्तिं तु त्रिगणमेतामाहु: सेना मुखं बुधा:
त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते।।
त्रयो गुल्मा: गणो नाम वाहिनी तु गाणस्त्रय:
स्मृतास्तिस्रस्तु वाहिन्य: पृतनेति विचक्षणै:।।
चमूस्तु पृतनास्तिस्रतिस्रश्चम्बस्त्वनीकिनी
अनीकिनीं दशगुणां प्राहुरक्षौहिणीं बुधा:।।
अक्षौहिण्या: प्रसंख्याता रखानां द्विजसत्तमा:।
संख्या गणिततत्वज्ञै: सहस्राण्येकविंशति:।।
शतान्युपरि चैवाष्टौ तथा भूयश्च सप्तति:।
गजानां च परीमाणमेतदेव विनिर्दिशेत्।।
ज्ञेयं शतसहस्रं तु हरस्राणि नवैव तु।
नराणामपि पञ्चाशच्छतानि त्रीणि चानघा:।।
पञ्चषष्टिसहस्राणि तथाश्वानां शतानि च।
दशोत्तराणि षट् प्राहुर्यथावदिह सख्यया।।
एतया संख्यया ह्यासन् कुरूपाण्डवसेनयो:
अक्षौहिण्यो द्विजश्रेष्ठा: पिण्डिताष्टादशैव तु।।[314]

पुनश्च,

कुरूक्षेत्रे अष्टादश अक्षौहिण्य: आसन्। सैन्यवर्गीकरणस्य उल्लेख: कृत: अस्ति। अत्र सेनाया: प्रकारस्य वर्गीकरणमपि लभ्यते। महाभारतस्य युद्धे सेनाया: प्राकाराणां चर्चा कुर्म: चेत् तत्र द्वाविंशति सेना: आसन्।

दु:शासन रथास्तूर्णं युज्यन्तां भीष्मरक्षिण: ।
द्वाविंशतिमनीकानि सर्वाण्येवाभिचोदय ।। [315]

**शतघ्नी**

शतघ्नी एकं भीमकायं आग्नेयास्त्रम् आसीत्। शतघ्नी चक्रेणयुक्तं आग्नेयास्त्रम् इति। शतघ्ने: संचरना कथम् अस्ति इति अत्र दृश्यते। लघुशतघ्नी द्वयो: चक्रिकयो: युक्तम् आग्नेयास्त्रं, वृहतकाय शतघ्नी चतुर्चक्रिकाभि: विनिर्मितम् आग्नेयास्त्रम्।

चतुश्चक्रा द्विचक्राश्च शतघ्नो बहुला गदा:।
चक्राणि च क्षुरान्तानि मण्डलानीव भास्वत:।। [316]

पुनश्च,

---

[313] आदि. 2.19

[314] आदि. अ.2, श्लो.19-28.

[315] भीष्म. अ.98,श्लो. 31.

[316] द्रोण. अ.199, श्लो.19.

घटोत्कच: शतघ्न्या: संधानं कृतवान्। स शतघ्नी चक्रयुक्ता आसीत्। शतघ्नी चक्रेनाधारिता आसीत्।

तेनोत्सृष्टा चक्रयुक्ता शतघ्नी
समं सर्वांश्चतुरोऽश्वाञ्जघान।
ते जानुभिर्जगतीमन्वपद्यन्
गतासवो निर्दशनाक्षिजिह्वाः।।[317]

अशनि अपि एकं आग्नेयास्त्रमिव प्रतीयते। घटोत्कच: अशनिम् अश्वस्थामारथं लक्ष्यं कृत्वा क्षिप्तवान्। अश्वस्थामा तम् अशनिं गृहीत्वा पुन: घटोत्कचमालक्ष्य एव क्षिप्तवान्। प्रकाशवत् अशनि घटोत्कचस्य रथं सारथिम् अश्वान् च भस्मीभूतं कृत्वा पृथिव्यां प्रवृष्टम्।

साश्वसूतध्वजं यानं भस्म कृत्वा महाप्रभा।
विवेश वसुधां भित्त्वा सुरास्तत्र विसिस्मयु:।।[318]

सौभ विमानस्य द्वारे शतघ्नी नामक आग्नेयास्त्रं वा युद्धास्त्रं संलग्नम् आसीत्।

अयं सौभं योधयामास स्वस्थं
विभीषणं मायया शाल्वराजम्।
सौभद्वारि प्रत्यगृह्णाच्छतघ्नीं
दोर्भ्यां क एनं विषहेत मर्त्य:।। [319]

महाभारते रामायणस्य आगते प्रसंगे शतघ्न्या: वर्णनम् लभ्यते। श्रीरामस्य सेना वानराणां यूथ: लंकाविजयस्य कृते आक्रमणं कृतवान्, तदा ते वानरा: सैनिका: तत्र मणिनिर्मितस्तंभान् च कर्णाट्टशिखराणि च भग्नं कर्तुम् आरब्धवन्त:। तस्य यन्त्राणि सर्वाणि नष्टानि कृतवन्त:। तत्र शतघ्नी अपि आसीत्। तत् आग्नेयास्त्रमपि नष्टं कृतवन्त:। महाभारते चक्रयुक्तशतघ्न्या: वर्णनं लभ्यते। रामायणे अपि चक्रयुक्तशतघ्न्या: वर्णनं लभ्यते, तत: एषा: अंशा: महाभारते उद्धृता:।

बिभिदुस्ते मणिस्तम्भान् कर्णाट्टशिखराणि च।
भग्नोन्मथितश्रृङ्गाणि यन्त्राणि च विचिक्षिपु:।। [320]

चक्रयुक्तशतघ्नीम् अपि वानर सैनिका: भग्नं कृतवन्त: क्षिप्तवन्त: च।

परिगृह्य शतघ्नीश्च सचक्रा: सहुडोपला:।
चिक्षिपुर्भुजवेगेन लङ्कामध्ये महास्वना:।। [321]

---

[317] द्रोण 179.46

[318] द्रोण 175.99

[319] उद्योग.अ.4,श्लो.79.

[320] वन.अ.284,श्लो.30.

[321] तत्रैव अ.284,श्लो.31.

**अश्वशक्तिः**

रथः अश्वेन चलति। अश्वाः वहन्ति रथम्। विष्णोः रथे सप्ताः अश्वाः आसन्। अर्जुनस्य रथे अश्वानां संख्या शतम् आसीत् इति वर्णितम्।

श्वेतास्तस्मिन् वातवेगाः सदश्वा
दिव्या युक्ताश्चित्ररथेन दत्ताः।
भुव्यन्तरिक्षे दिवि वा नरेन्द्र
येषां गतिर्हीयते नात्र सर्वा।।
शतं यत् यत् पूर्यते नित्यकालं
हतं हतं दत्तवरं पुरस्तात्।।[322]

अस्तु, अश्वानां संख्या एव रथस्य गतिर्निर्धारणं कर्तुं समर्था। यस्य रथे अश्वानां संख्या यावत्, सः रथः तदनुसारेण गतिमाप्नोति। अश्वस्य शक्तिः एव अश्वशक्तिः। अद्यापि 'शक्ति' एतस्य इकाई अश्वशक्तिः एव अस्ति। अश्वशक्ति (HOURSE POWER), 'हॉर्सपॉवर' शब्दस्यः प्रयोगः अष्टादशे शताब्दौ स्कॉटलैंडदेशस्य एकः अभियन्ता जेम्सवाटमहोदयेन कृतः। सः 'वाष्प-इंजन' एतेन उत्पन्नस्य शक्त्याः तुलना अश्वेन सह कृतवान्। अत्र अर्जुनस्य रथः बहु तीव्रगामी आसीत्। शतं अश्वशक्तिः परिमाणं नीहितम् आसीत्।

**नगरसुरक्षा**

नगरसुरक्षार्थे महती परिमाणे लौहपाशाः आसन्। श्रीकृष्ण षट् सहस्राणि लौहमयपाशानां निर्मोचनं कृतवान्। एतावत् परिमाणे लोहपाशस्य उत्पादनस्य व्यवस्थापि स्यात्। अत्र लोहपाशस्य इदृशं वर्णनम् अस्ति येन प्रतीयते यत् अन्यत्र दुर्गे नगरे च एतादृशा व्यवस्था निश्चयेन स्यात्।

निर्मोचने षट् सहस्राणि हत्वा
संच्छिद्य पाशान् सहसाक्षुरान्तान्।
मुरं हत्वा विनीहत्यौघरक्षो
निर्मोचनं चापि जगाम वीरः।।[323]

श्रीकृष्णः निर्मोचननगरस्य समीपं गत्वा षट् सहस्रं लौह पाशं संच्छिद्यवान्।

**युद्धनीतिः**

महाभारते वर्णनम् अस्ति यत् युद्धकाले राजानः कीदृशः व्यवहारः करणीयः इति।
सैनिकेभ्यः अग्रिमवृत्तिः दीयताम्। राजानौः पियवादिनः भवेयुः, तर्हि ते सैनिकाः अपि राजभ्यः सम्यक् रूपेण कार्याणि करिष्यन्ति।

तेषामग्रप्रदायी स्याः कल्योत्थायी प्रियंवदः।

---

[322] उद्योग..अ.56,श्लो.13.
[323] तत्रैव.अ.48,श्लो.83.

ते त्वां प्रियं करिष्यन्ति पुरो धास्यन्ति च ध्रुवम्।। [324]

**योग्यसैनिक:**

ना अति वृद्धः, ना अति बाल:, ना अति कृश:, ना अति स्थूल: भवेत् सैनिक:। स्वस्थ:, अनारोग्य:, लघुवृत्तायत:, बलिष्ठगात्रयुक्त: इत्यादि उत्तमानां सैनिकानां लक्षणम्।

नातिवृद्धमबालं च नाकृशं नातिपीवरम्।
लघुवृत्तायतप्रायं सारगात्रमनामयम्।। [325]

## संदर्भग्रन्थसूची


- Dharmpal, *Indian Science and Technology in the Eighteenth Century*, Impex India Delhi.
- Kangle R.P., *Kautilya Arthashashtram*, Motilal Banarsi Dass Publishers Pvt Ltd.
- *Mahabharata*, Bhandarkar Oriental Research Institute, Pune.
- *Mahabharata*, Gita Press, Gorakhpur, Samvata-2067, 15th Reprint.
- Sbbuarayappa B V, *A Concise History of Science of India*, India National Science Academy, Delhi.
- Shashtri Ambikadutta., Sushruta Sanhita, Sushruta, Chaukhambha Sanskrit Series, Varansi.
- Soni Suresh, *Bharat men Vigyan ki UjjwalParampara*, Archana Prakashan, 17 Bhapal
- Vriksayurveda of Parashara


[324] तत्रैव अ.135,श्लो.35.

[325] द्रोण 114.3

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-44 , YEAR 11, VOL -I, DOI-30-01-2021 | Since 2010

# तर्कसंग्रहभाषापरिच्छेदग्रन्थानुसारं कारणस्वरूपविमर्शणम्

(An Analysis According to the Tarkasaṃgraha and the Bhāṣāpariccheda on the Cause)

**Pranabesh Bhattacharya**
Ph. D. Scholar,
Bankura University, Bankura, West Bengal.

**SID**-344535972

**Received on**-11/29/2020 14:14:29 | **Accepted on-** 26th January, 2021

**प्रमुखशब्दाः-** कारणम्, कारणतावच्छेदकसम्बन्धः, पूर्ववृत्तिः, अन्यथासिद्धः, नियत

## शोधसारः

भारतीयदर्शने कार्यकारणसम्बन्धविषयमाधारीकृत्य सर्वैः दार्शनिकसम्प्रदायैः भिन्नानि अभिमतानि उपस्थापितानि। तेषु अभिमतेषु अत्र न्यायवैशेषिकदर्शनसम्मतानि अभिमतानि अङ्गीकृतानि। अतः तर्कसंग्रहग्रन्थानुसारं भाषापरिच्छेदग्रन्थानुसारं च कारणस्वरूपमत्र विचार्य्यते मया। अयमेव शोधनिबन्धस्यास्य विषयः। अस्मिन् विषये केचित् सन्देहाः दृष्टाः। यथा कारणस्य विभागः न साक्षात् सम्भवति, परन्तु कथं तत्कृतमस्ति तर्कसंग्रहग्रन्थे ? इत्यादि। अतः सन्देहदूरीकरणपूर्वकं पूर्वोक्तविषयस्य विश्लेषणमेव शोधनिबन्धस्यास्य प्रयोजनम्। अत्र विश्लेषणात्मकगवेषणापद्धतिः अनुसृता।

## ABSTRACT

Each community of Indian philosophy has expressed their opinions in different ways on the relationship between cause and effect. In this research paper only the opinion of *Nyāya-Vaiśeṣika* Philosophy has been adopted among them. So I have analyzed the nature of causes according to the *Tarkasaṃgraha* and the *Bhāṣāpariccheda*, which is the main topic of this research paper. I have found some doubts in this regard. So I have analysed and resolved those doubts in this research paper. For example, the division of causes is not possible in a direct way, but why is it discussed directly in the *Tarkasaṃgraha*? etc. Therefore, the main requirement of this research paper is to remove the doubts and make a proper analysis of the above topic. This research paper follows analytical research methodology.

भारतीयदर्शने कार्यकारणसम्बन्धविषयमाधारीकृत्य सर्वैः दार्शनिकसम्प्रदायैः भिन्नानि अभिमतानि उपस्थापितानि। तेषु अभिमतेषु अत्र न्यायवैशेषिकदर्शनसम्मतानि अभिमतानि अङ्गीकृतानि। अतः तर्कसंग्रहग्रन्थानुसारं भाषापरिच्छेदग्रन्थानुसारं च कारणस्वरूपमत्र विचार्य्यते मया। अयमेव शोधनिबन्धस्यास्य विषयः। अस्मिन् विषये केचित्

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-44 , YEAR 11, VOL -I, DOI-30-01-2021 | Since 2010

सन्देहाः दृष्टाः। यथा कारणस्य विभागः न साक्षात् सम्भवति, परन्तु कथं तत्कृतमस्ति तर्कसंग्रहग्रन्थे ? इत्यादि। अतः सन्देहदूरीकरणपूर्वकं पूर्वोक्तविषयस्य विश्लेषणमेव शोधनिबन्धस्यास्य प्रयोजनम्। अत्र विश्लेषणात्मकगवेषणापद्धतिः अनुसृता।

➢ **भूमिका**

क्रियते साध्यते जन्यते अनेनेति कार्योत्पादकं कारणम्। तच्च कार्योत्पादकं व्याप्तिसम्बन्धज्ञानसापेक्षम्। तदभावात् न तु कस्यचित् पदार्थस्य कारणता सिध्यति। यथा यत्र यत्र धूमस्तत्र तत्र वह्निः इत्यत्र सकलधूमसमानाधिकरणेषु वह्निवृत्तित्वात् धूमस्य वह्निव्याप्यत्वं सिध्यति। अतः जन्यधूमकार्यं प्रति वह्निमात्रस्य कारणता शास्त्रसिद्धा, न तु जलादीनां व्याप्तिसम्बन्धाभावादित्यभिप्रेतः। अत्र कारणस्य स्वरूपं कारणस्वरूपमिति षष्ठीतत्पुरुषसमासः, अथवा कारणगतं स्वरूपमिति कर्मधारयसमासः। तस्य च कारणस्वरूपस्य विमर्शणं नाम संक्षेपेण विश्लेषणम्। तादृशविश्लेषणं तावत् तर्कसंग्रहभाषापरिच्छेदग्रन्थोक्तमतनिरूपितम्। तेन कारणविषये यादृशानि विवृतिकरणानि तर्कसंग्रहग्रन्थे भाषापरिच्छेदग्रन्थे च प्रतिपादितानि तेषां विश्लेषणं, तथा च विभिन्नविषयसंयुक्तसंशयाः, तन्निराकरणञ्चास्माभिः प्रतिपाद्यरूपेणाङ्गीकृतमत्र। सत्यमेत् न हि सर्वेषु विषयेषु संशयः परिदृश्यते। अतः ज्ञायमानसंशयानां विचारः यथामति क्रियतेऽत्र। ते च संशयाः यथा साक्षात् कारणभेदासम्भवात् तर्कसंग्रहग्रन्थोक्तं कारणभेदनिरूपणं कथङ्कारं तावत् संगच्छते? भाषापरिच्छेदे ग्रन्थकारेण कारणत्वविभागनिर्वचने कारणत्वं हेतुत्वञ्चेति द्विविधपदाध्याहारस्य का युक्तिः? इत्यादयः। अस्मदध्याहृतग्रन्ययोः सम्यक् मतविश्लेषणार्थं प्रसङ्गानुसारं तत्तद्ग्रन्थयोः टीकाग्रन्थानामपि यथामति अध्ययनं क्रियते।

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तत इत्यार्षवाक्यानुसारमिदानीमस्य निबन्धस्य प्रयोजनमुद्यते। वस्तुतः प्रयोजनरहितं शास्त्रं न केषामपि अध्ययनप्रवृत्तेः विषयः भवति। अतः कारणविषयमाधारीकृत्य तर्कसंग्रहभाषापरिच्छेदग्रन्थोक्तमतानां संशयनिराकरणपूर्वकं यथार्थविषयविश्लेषणमुपस्थाप्यतेऽत्र यथामति, तदेव निबन्धस्यास्य प्रयोजनम्। अनेन विषयस्य बोधसारल्यं वर्द्धेतेति विश्वासः।

उक्तविषयप्रतिपादनात् निबन्धेनानेन समं प्रतिपाद्यविषयस्य प्रतिपाद्यप्रतिपादकभावसम्बन्धः। अपि च निबन्धस्यास्याध्यनेन न्यायवैशेषिकतत्रस्यैकं विशेषज्ञानं जायते। तादृशज्ञानानुसन्धिनां समीपे निबन्धोऽयं साधनं, जायमानं ज्ञानञ्च साध्यमित्यत्र साध्यसाधनसम्बन्धोऽपि सिध्यति।

न्यायवैशेषिकदर्शनस्य विशेषज्ञानानुसन्धी निबन्धस्याधिकारी। सत्येपि सामान्यज्ञाने लोके विशेषं प्रत्यनुवर्तत इति यावत्। निबन्धेऽस्मिन् विश्लेषणात्मकगवेषणापद्धतिः अनुश्रियते।

➢ **दर्शनसाहित्ये कारणम्**

पुरा भारतीयदर्शनसाहित्ये प्रत्येकदर्शनसम्प्रदायः कार्यकारणसम्बन्धविषये स्वस्वमतानि प्रकटितानि। तस्मात् भारतीयदर्शने सर्वत्र हेतुहेतुमद्भावो व्याख्यातः। कार्यकारणसम्बन्धविषये भारतीयदर्शनशास्त्रे चतुर्विधः मतभेदः दृश्यते। तत्र प्रथमस्तावदसतः सज्जायत इति सौगताः संगिरन्ते। द्वितीयस्तु वेदान्तिनां विवर्तवादः। तन्मते कार्यजातं वस्तु न सदिति। तृतीतस्तु सांख्यामते सत्कार्यवादः। सतो सज्जायत इति। शेषस्तावत् न्यायमते असत्कार्यवादः। तच्छरूपं यथा सतोऽसज्जायत इति। तत्र सौगतानामसतः सज्जायत इति न प्रामाणिकपक्षः, असतो निरूपाख्यस्य शशविषाणवत् कारणत्वानुपपत्तेः। अद्वैतमते जगत्प्रपञ्चपऽयं मिथ्याभूतः। किन्तु बाधकाभावात् प्रपञ्चप्रत्ययस्य भ्रमता न युक्ता। सांख्यास्तु सत्कार्यवादिनः। ते

[A First International Electronic Peer-reviewed Quarterly Refereed-
**UGC Approved** (41039), **SCOPUS** Registered Sanskrit Tri-lingual Journal with **Journal Factor**]
**URL-** www.jahnavisanskritejournal.in **ISSN**-0976-8645 **ISSUE**-44 , **YEAR** 11, **VOL** -I, DOI-30-01-2021 | Since 2010

कार्यकारणयो: तादात्म्यमङ्गीकुर्वन्ति। परन्तु असत्कार्यवादिनां नैयायिकानां नये तादात्म्येन कार्यकारणयोरभिन्नत्वेन वा कारणत्वहानिप्रसङ्ग:, कारणस्य कार्यनियतपूर्ववृत्तित्वनियमात्। अपि च कार्यकारणयोरभिन्नत्वनियमेन घटकपालयोरभिन्नत्वे स्वीकृते घटोत्पत्ते: कारणव्यापारभङ्गप्रसङ्ग:। तेन च सिद्धं कारणं सदपि कार्यमसत्। तच्च कारणं किं स्वरूपकमिति तर्कसंग्रहभाषापरिच्छेदग्रन्थोक्तमतप्रतिपादनपुर:सरं संक्षेपेण प्रस्तुयते विचारोऽत्र।

- **कारणलक्षणविमर्श:** तर्कसंग्रहकारेण श्रीमदन्नंभट्टोपाध्यायेन कारणलक्षणमुक्तम् 'कार्यनियतपूर्ववृत्ति कारणम्' [326] - इति। कार्यं प्रति नियतत्वे सति पूर्ववृत्तित्वमिति तदर्थ:। यथा पटकार्यं प्रति तन्त्वादीनां नियतपूर्ववृत्तित्वात् कारणत्वम्। तथा चेत् सति पटं प्रति तन्तूनां कारणत्वेन सह तन्तुरूपेऽपि कारणत्वापत्ति:, पटं प्रति नियतपूर्ववृत्तित्वादिति। जन्यपटं प्रति तन्तुरूपाकाशादिपदार्थानां नियतपूर्ववृत्तित्वं तावल्लौकिकम्। अत: तेषां नियतपूर्ववृत्तित्वावच्छिन्नं ज्ञानं सिध्यतीति पूर्वपक्ष:। परन्तु शास्त्रविरुद्धत्वात् तन्न सिद्ध:। तस्मात् पूर्वपक्षस्य तन्तुरूपादावन्यथासिद्धविषये कारणलक्षणस्यातिव्याप्तिपरिहाराय तत्रभवता तर्कदीपिकायां पुनरुक्तम् 'अनन्यथासिद्धनियतपूर्ववृत्तित्वं कारणत्वम्'[327] - इति। इदानीमनन्यथासिद्धपदाध्याहारात् कारणलक्षणस्यापगता पूर्वोक्तापत्ति:। कारणलक्षणनिर्वचने भाषापरिच्छेदकारेण श्रीविश्वनाथपञ्चाननभट्टाचार्येनाप्युक्तम् -

'अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता।
कारणत्वं भवेत् तस्य त्रैविध्यं परिकीर्तितम्।।'[328] - इति।

कार्योत्पत्त्यव्यवहितपूर्वक्षणावच्छेदकावच्छिन्ने कार्याधिकरणे यदन्यथासिद्धविरहविशिष्टजन्यपदार्थव्यापकीभूतपदार्थ: कार्यतावच्छेदकसम्बन्धेन समवायेन वर्तते तत्कारणमित्युच्यते। कार्यपदार्थस्य स्वकारणवृत्तिसम्बन्ध एव कार्यतावच्छेदकसम्बन्ध:। अन्यथासिद्धिशून्य इति पदप्रयुक्ताभावात् पूर्ववृत्तित्वाच्च घटकार्यं प्रति रासभादिषु कारणलक्षणस्यातिव्याप्त्यापत्ति:। नियत इति पदस्यार्थ: व्याप्तिरिति। व्याप्यव्यापकयो: सहचारसम्बन्ध: व्याप्ति:। (यत्र यत्र कार्यत्वं तत्र तत्र कारणत्वमिति व्याप्ति:)।

पूर्वं वृत्तिरिति पूर्ववृत्ति:। पूर्वशब्दस्य सापेक्षत्वात् कस्मात् पूर्वमिति चेदुच्यते, कार्योत्पत्ते: पूर्वमिति। अत्र पूर्वत्वञ्चाव्यवहितपूर्वकालत्वमित्वेव ग्रहनीयं, न तु पूर्वकालसामान्यत्वम्। अन्यथा अद्यतनीयपटकार्यं प्रति ह्यस्तनीयपटकार्यस्य कारणानां कारणत्वमापद्येत, तेषामन्यथासिद्धत्वे सति नियतपूर्ववृत्तित्वात्। अर्थात् कार्योत्पत्त्यव्यवहितपूर्वक्षणवृत्तित्वमेव पूर्ववृत्तित्वपदार्थ इत्यङ्गीकरणीय:। तेन ह्यस्तनीयपटकार्यस्य कारणानामव्यवहितपूर्वक्षणवृत्तित्वाभावादद्यतनीयपटकार्यं प्रति न कारणत्वम्। वृत्तिश्चाधिकरणसापेक्षा। ननु कुत्र वृत्तिरिति चेदुच्यते यस्मिन्नधिकरणे समवायेन कार्यमुत्पद्यते तदधिकरणवृत्ति:। कार्योत्पत्त्यव्यवहितप्राक्क्षणावच्छेदेन कार्याधिकरणवृत्तित्वं पूर्ववृत्तित्वमिति यावत्।

नियतत्वं नियमयुक्तत्वं सहचारसम्बन्धावच्छिन्नत्वम्। स च सम्बन्ध: व्याप्यव्यापकनिरूपिता व्याप्तिरित्यर्थ:। हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिरिति। यथा पर्वत: वह्निमान् धूमादित्यत्र हेतो: धूमस्य समानाधिकरणानि महानसादिस्थानानि। (वह्निधूमयो: साहचार्यवृत्तित्वात् तेषां समानाधिकरणसंज्ञा)। सत्येपि सकलद्रव्यानामत्यन्ताभावे वह्नेरत्यन्ताभाव: न विद्यते महानसादौ । महानसादौ सदैवात्यन्ताभावस्याप्रतियोगित्वेन वह्नि:

---

[326] त.सं. पृ०सं० 90.
[327] त.सं. पृ०सं० 90.
[328] कारि. पृ०सं० 108.

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-44 , YEAR 11, VOL -I, DOI-30-01-2021 | Since 2010

(साध्यम्) सिध्यति। अर्थात् धूमसमानाधिकरणात्यन्ताभावप्रतियोगिघटादिद्रव्यभिन्नेन साध्येन वह्निना सह धूमस्य सामानाधिकरण्यं महानसादिवृत्तित्वात् लक्षणसमन्वयः। वस्तुतः व्याप्त्याश्रयः व्याप्यः, व्याप्तिनिरूपकः व्यापकः। तत्र व्याप्तिनिरूपकत्वात् नियतत्वं नाम व्यापकत्वम्। तच्च कार्याधिकणवृत्यन्ताभावाप्रतियोगित्वम्। तेनान्यथासिद्धिशून्तत्वे सति कार्योत्पत्त्यव्यवहितप्राक्क्षणावच्छेदेन कार्याधिकरणवृत्त्यत्यन्ताभावाप्रतियोगितावच्छेदकधर्मवत्वं कारणत्वमिति।

अनियतरासभादावतिव्याप्तिवारणाय नियतेति पदस्याध्याहारः। यत्किञ्चित् घटं प्रति मृदाद्यानयनद्वारा रासभस्य कारणतासम्भवेऽपि घटत्वावच्छिन्नं प्रति कारणत्वं नास्ति, यतो यादृशघटादिकार्ये या मृत्तिका रासभेन नानीता तादृशघटवन्निष्ठात्यन्ताभावप्रतियोगित्वस्य रासभे सत्त्वात् रासभो न नियतपूर्ववृत्तिः।

अतोऽन्यथासिद्धशून्यत्वे सति कार्योत्पत्त्यव्यवहितप्राक्क्षणावच्छेदेन कार्याधिकरण-वृत्त्यत्यन्ताभावाप्रतियोगितावच्छेदकधर्मवत्वं कारणत्वमिति फलितार्थः। नन्वेवमप्यव्याप्तिर्दृश्यते। तथाहि क-नामकपटकार्याव्यवहितप्राक्क्षणे यदि ख-नामकपटकार्यसामग्री स्थानान्तरे उपतिष्ठते, तर्हि ख-नामकपटकार्यस्य तन्त्वादीनां कारणानां क-नामकपटकार्यं प्रति कारणत्वमापद्येत इति चेन्न, कार्याधिकरणस्य कार्यतावच्छेदकसम्बन्धेनैव विवक्षितत्वात्। कार्यस्य तदधिकरणवृत्तिनिरूपकसम्बन्ध एव कार्यतावच्छेदकसम्बन्धः। अत्र पटकार्यं तदधिकरणे तन्तौ समवायेनावतिष्ठते, तस्मादत्र समवायः कार्यतावच्छेदकसम्बन्धः। यद्यपि कार्यतावच्छेदकसमवायसम्बन्धेन ख-नामकपटकार्यस्य कारणभूतानां तन्तूनां क-नामकपटकार्यस्याधिकरणत्वं नास्ति, तथापि कालिकसम्बन्धेन क-नामकपटकार्यस्याधिकरणं ख-नामकपटकार्यस्य कारणभूतः तन्तुः। तेन च क-नामकपटकार्योत्पत्त्यव्तवहितप्राक्क्षणे कालिकसम्बन्धेन क-नामकपटकार्याधिकरणे ख-नामकपटकार्यस्य कारणभूतस्य तन्तोः क-नामकपटकार्यस्य समवायिकारणत्वमापद्येत। अतः कार्याधिकरणं येन केनापि सम्बन्धेन न विवक्षितम्। अत्र च कार्यतावच्छेदकसमवायसम्बन्धेन क-नामकपटकार्यस्य समवायिकारणं तन्तुरेव तस्यादिकरणं स्यात्, न तु ख-नामकपटकार्यस्य समवायिकारणं तन्तुः। तस्मात् नाव्याप्तिः। एवञ्चात्रान्यथासिद्धिशून्यत्वे सति कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्यातावच्छेदकसम्बन्धावच्छिन्नकार्याधिकरणवृत्त्यत्यन्ताभावा-प्रतियोगितावच्छेदकधर्मवत्वं कारणत्वमिति फलितम्

परन्तु तथाप्यव्याप्तमिदं लक्षणम्। तथाहि क-नामकपटकार्योत्पत्त्यवव्यवहितपूर्वक्षणे कार्यतावच्छेदकसमवाय-सम्बन्धेन क-नामकपटकार्याधिकरणे तन्तौ ख-नामकपटकार्यस्य कारणभूततन्तोः कालिकसम्बन्धेन विद्यमानत्वात् क-नामकपटकार्यं प्रति ख-नामकपटकार्यस्य कारणभूतस्य तन्तोः कारणत्वापत्तिः। अतः कार्याधिकरणवृत्तित्वं हि कारणतावच्छेदकसम्बन्धेन बोध्यम्। कारणस्य कार्याधिकरणवृत्तिसम्बन्ध एव कारणतावच्छेदकसम्बन्धः, तेनैव सम्बन्धेन कारणं कार्यमुत्पादयति। तस्मात् कारणभेदात् कारणतावच्छेदकसम्बन्धोऽपि भिद्यत इति सुलभबोध्यः। यथा पटकार्याधिकरणे तन्तौ तन्तुः तादात्म्येनावतिष्ठते। अतः पटकार्यं प्रति यदि तन्तोः कारणत्वमङ्गीक्रियते तर्हि तत्र कारणतावच्छदकसम्बन्धो हि तादात्म्यमिति। एवं तन्तुसंयोगस्य कारणत्वमुच्यते तर्हि तत्र समवाय एव कारणतावच्छदकसम्बन्धः, पटकार्याधिकरणे तन्तौ समवायेन तन्तुसंयोगस्य विद्यमानत्वात्। तुरीवेमादीनां यदि कारणत्वमुच्यते तर्हि पटकार्याधिकरणे तन्तौ स्वप्रयोज्यविजातीयतन्तुसंयोगसम्बन्धेन तेषां विद्यमानत्वात् तत्र कारणतावच्छेदकसम्बन्धः स्वप्रयोज्यविजातीयतन्तुसंयोगः। पटकार्यं प्रति तन्तोः कारणत्वस्वीकृते क-नामकपटकार्याधिकरणे तन्तौ कारणतावच्छेदकेन तादात्म्यसम्बन्धेन क-नामकपटकार्यस्य कारणं तन्तुमात्रमेव विद्यते। तस्मात् येन केनापि सम्बन्धेन न कार्याधिकरणवृत्तित्वमपि तु कारणतावच्छेदकसम्बन्धेनैव। तेन नाव्याप्तिः। एवञ्चान्यथासिद्धिशून्यत्वे सति कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्यतावच्छेदकसम्बन्धावच्छिन्नकार्याधिकरण-वृत्तिकारणतावच्छेदकसम्बन्धावच्छिन्नात्यन्ताभावाप्रतियोगितावच्छेदकधर्मवत्त्वं कारणत्वमिति।

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-44 , YEAR 11, VOL -I, DOI-30-01-2021 | Since 2010

- **अन्यथासिद्धय:**

जन्यपदार्थं प्रति नियतत्वावच्छिन्नानां पूर्ववृत्तित्वावच्छिन्नानाञ्च पदार्थसमूहानामुपस्थिति: परिलक्ष्यते। यथा घटकार्यस्य कपाल:, तच्छमवेतरूपं, कपलद्वयसंयोग:, चक्रं, दण्ड:, आकाश:, कुलाल:, तज्जनक: इत्यादय:। परन्तु न तेषां सर्वेषां कारणत्वं सिध्यति घटकार्यं प्रति। कार्यनियतपूर्ववृत्तित्वमात्रं चेत् कारणलक्षणं तेन तेषां कारणत्वप्रसक्ति:। तथा चेत् सति कारणलक्षणस्यातिव्याप्त्यापत्ति:। यथा कपालरूपे घटनियतपूर्ववृत्तित्वज्ञानं घटसमवायिकारणकपालेनैव सिध्यति। अयमाशय: कपालरूपस्य कपालेतरपदार्थवृत्तित्वाभावात् कपालनिरूपितं तावत् तस्य पूर्ववृत्तित्वमिति। न ह्यत्र घटस्य प्रसक्ति:। एवं जन्यपदार्थं प्रति तेषां पदार्थानां पृथक् संज्ञा प्रदत्ता न्यायवैशेषिकाचार्यै:। यथा अन्यथासिद्ध: इति। अन्यरूपेण भिन्नभावेन सिद्ध इति तदर्थ:। न तेषां कारणत्वं विवक्षितकार्यं प्रति सिध्यतीति यावत्। भाषापरिच्छेदे पञ्चविधा:, तर्कसंग्रहे त्रिविधाश्चान्यथासिद्धय: प्रतिपादिता:।

- **विश्वनाथमते प्रथमान्यथासिद्ध:**

भाषापरिच्छेदकारमते प्रथमान्यथासिद्धस्तावत् कारणतावच्छदकधर्म:। यत्कार्यं प्रति कारणस्य पूर्ववर्तिता येन धर्मपुरस्कारेण ज्ञायते, तत्कार्यं प्रति तद् धर्म: अन्यथासिद्ध:। यद्धर्मावच्छिन्नं कार्यं प्रति कारणस्य पूर्ववर्तिता यद्रूपावच्छेदेन गृह्यते, तद्धर्मावच्छिन्नं कार्यं प्रति तद्रूपमन्यथासिद्धमित्यभिप्राय:। यथा घटकार्यं प्रति दण्ड: कारणम्। दण्डत्वस्यापि दण्डवत् घटपूर्ववृत्तित्वादपि नास्ति तस्य कारणता। अत्र घटत्वावच्छिन्नघटकार्यं प्रति दण्डरूपकारणस्य पूर्ववर्तिता दण्डत्वरूपावच्छेदेनैव संगृह्यते। सामान्यत्वात् दण्डत्वस्य समवायेन दण्डमात्रवृत्ति: सिध्यति। तस्मात् तस्य घटपूर्ववृत्तित्वं दण्डेणैव ज्ञायमानत्वात् घटत्वधर्मावच्छिन्नं घटकार्यं प्रति दण्डत्वमन्यथासिद्धम्। 'येन सह पूर्वभाव:' - इत्यनेन प्रतिपादितं प्रथमान्यथासिद्धं विश्वनाथोपाध्यायेन।

- **विश्वनाथमते द्वितीयान्यथासिद्ध:**

विश्वनाथमते कारणपदार्थसमवेतविशेषगुण: हि द्वितीयान्यथासिद्ध:। तथोक्तं तेन 'कारणमादाय वा यस्य' इति। यस्य स्वातन्त्रेण कारणनिरपेक्षेण अन्वयव्यतिरेकनियम: नास्ति, परन्तु स्वकारणापेक्षेण तच्छिध्यति स च पदार्थ: द्वितीयान्यथासिद्ध इत्यर्थ:। तत्र स्वाधिकरणे कार्यसत्त्वमन्यय:, स्वाभावाधिकरणे कार्याभावो व्यतिरेक:। तथाहि घटकार्यं प्रति दण्ड: कारणं, नियतपूर्ववृत्तित्वात्। परन्तु घटकार्यं प्रति दण्डगतरूपस्यापि नियतपूर्ववृत्तित्वेऽपि न कारणता सिद्धा। दण्डगतरूपस्य नियतपूर्वभावित्वज्ञानस्य दण्डाधीनत्वात्। दण्डरूपं हि स्वाश्रयभूतदण्डेण नियतपूर्वभावित्वमाप्नोति। तेन च दण्डरूपसत्वे घटसत्त्वं, तदभावे च घटाभाव इत्यन्वयव्यतिरेकनियम: दण्डकारणनिरपेक्षेण न सम्भवति कदापि। किन्तु दण्डकारणमादायैव तस्यान्वयव्यतिरेकौ गृह्यते। तस्मात् घटं प्रति दण्डरूपमन्यथासिद्धम्। एवं पटं प्रति तन्तुरूपमपि पूर्ववत्।

- **अन्नंभट्टमते प्रथमान्यथासिद्ध:**

विश्वनाथप्रणीतं पूर्वोक्तं मतद्वयमेकत्रेण अन्नंभट्टेन प्रथमान्यथासिद्धरूपेण प्रतिपादितं तर्कदीपिकायाम्। तेन प्रोक्तम् 'येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते, तत्तेनान्यथासिद्धम्। यथा तन्तुना तन्तुरूपं तन्तुत्वञ्च पटं प्रति'[329] - इति। अत्र तन्तुरूपमित्यनेन कारणपदार्थसमवेतविशेषगुण:, तन्तुत्वमित्यनेन कारणतावच्छदकधर्मश्च प्रतिपाद्यते ग्रन्थकारेण। ननु

[329] त.सं. पृ0सं0 90.

भिन्नपदार्थत्वात् कथं तयो: समूहेन प्रथमान्यथासिद्धरूपेणोपन्यस्तम्? वस्तुत: उभयो: तादृशभिन्नत्वेऽपि कारणपदार्थसमवेतत्वात् तयो: साजात्यमत्र स्वीकरणीयमिति भवितुमर्हति।

- **विश्वनाथमते तृतीयान्यथासिद्ध:**

आकाश: तृतीयान्यथासिद्धरूपेण परिगण्यते भाषापरिच्छेदकारेण। विशिष्टज्ञानं प्रति विशेषणज्ञानस्य कारणत्वात् आकाशविशेषणीभूताकाशत्वज्ञानाभावात् तद्विशिष्टमाकाशज्ञानं न सम्भवति। न्यायनये रूपाभावादाकाशप्रत्ययं न भवति। अत: शब्दसमवायिकारणत्वेन आकाशस्तावदनुमेयपदार्थ:। तेन आकाश: शब्दजनकत्वमात्रेण शब्दसमवायिकारणत्वमात्रेण वा सिध्यति। आकाशस्य तादृशज्ञानान्तरमेव तत्र घटादिकार्यपूर्ववर्तित्वात् घटादिकार्यं प्रति आकाश: अन्यथासिद्ध:। 'अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम्' - इत्यनेन तृतीयान्यथासिद्धमाह ग्रन्थकार:। अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते, तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वमित्यर्थ:। ननु विभुद्रव्यत्वात् सकलमूर्तपदार्थसंयोगरूपकार्यं प्रत्याकाशस्य कारणता कथङ्कारं सिध्यति? यत: संयोगस्तत्र द्विष्ठवृत्तित्वात् आकाशे समवायेन तिष्ठति। न तत्र शब्दसमवायिकारणत्वप्रसक्ति:। उच्यते तत्र आकाशस्य कारणता द्रव्यत्वेन सिध्यति। तेन आकाशद्रव्यवृत्ति: सकलमूर्तपदार्थनिरूपितसंयोग:। अत: दूरीभूत: संशय:।

कारणता किञ्चिर्मावच्छिन्ना - इति शास्त्रानुरोधं शब्दं प्रत्याकाशस्य कारणतावच्छेदकधर्ममपि वक्तव्यम्। आकाशस्य कारणावच्छेदकधर्मास्वीकारात् तस्य कारणत्वहानिप्रसङ्ग: निरवच्छिन्नकारणतासिद्धत्वात्। अत: इदानीमाकाशस्य कारणत्वस्वीकृते सति तदवच्छेदकधर्ममपि वक्तव्यम्। अत्रैवमुच्यते क-कारादिध्वन्यात्मकवर्णानाम् आकाशवृत्तित्वात् आकाशं कवत्त्वादिति कारणतावच्छिन्नम्। एतेन क-कारादीनामनेकसंख्यकत्वात् गौरवदोषापत्ति:, अपि च तेषाम् अनित्यत्वात् सार्वकालिकत्वहानिप्रसङ्ग:। तस्मात् आकाशसमवेतपरममहत्परिमाणवत्त्वं तदेकत्वं (संख्याविशेष:) वा विशेषपदार्थ: आकाशस्य कारणतावचदछेदकधर्मत्वेन स्वीकरणीयमिति विश्वनाथमतम्।

- **विश्वनाथमते चतुर्थान्यथासिद्ध:**

विवक्षितकार्यं प्रति जनकस्य जनकं अन्यथासिद्धमिति। यथा घटकार्यस्य कुलालपितृत्वेन कुलालपिता अन्यथासिद्ध: कुलालपूर्ववर्तित्वात्। अत: यत्र कार्यजनकस्य पूर्ववर्तित्वज्ञानान्तरमेव कार्यस्य पूर्ववर्तित्वज्ञानं भवति तदन्यथासिद्ध:। परन्तु तादृशघटकार्यं प्रति कुलालपितु: कुलालत्वमात्रेण कारणत्वं सिध्यति। घटपूर्ववर्तित्वात्। उक्तञ्च ग्रन्थकारेण 'जनकं प्रति पूर्ववर्त्तितामपरिज्ञाय न यस्य गृह्यते' - इति। कार्यजनकं प्रति गृहीतपूर्ववृत्तिर्यस्तत्कार्यं प्रति पूर्ववर्तितया ज्ञायते कारणकारणं तच्चतुर्थमन्यथासिद्धमिति यावत्। तस्य हि कुलालपितृत्वेन पूर्ववर्तित्वात् कार्यजनकं कुलालं प्रति कारणत्वं, कुलालस्य च घटं प्रति पूर्ववर्तित्वात् कारणत्वम्। तस्मात् कुलालपितुरपि परम्परया घटकार्यं प्रति पूर्ववर्तित्वं गृह्यते। तेन हि कारणकारणस्य कुलालपितुर्घटकार्यं प्रत्यन्यथासिद्धत्वम्।

ननु कारणकारणस्यान्यथासिद्धत्वे स्वर्गं प्रति यागस्यान्यथासिद्धत्वमापद्येत, तस्य स्वजन्यस्वर्गजनकापूर्वं प्रति कारणत्वादिति चेन्न, दर्शपौर्णमासाभ्यां स्वर्गकामो यजेत - इति श्रुत्वा स्वर्गं प्रति यागस्य पूर्ववर्तित्वे प्रथममवगते पश्चादपूर्वं प्रति पूर्ववर्तित्वग्रहात्। अत एव व्यापारेण व्यापारिणो नान्यथासिद्धत्वमिति नियम:।

- **अन्नंभट्टमते द्वितीयान्यथासिद्ध:**

विश्वनाथप्रणीतं पूर्वोक्तं मतद्वयमेकत्रेण अन्नंभट्टेन द्वितीयान्यथासिद्धरूपेण प्रतिपादितं तर्कदीपिकायाम्। तेन प्रोक्तम् 'अन्यं प्रति पूर्ववृत्तित्वे ज्ञात एव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तदन्यथासिद्धम्। यथा शब्दं प्रति पूर्ववृत्तित्वे ज्ञाते एव पटं प्रति आकाशस्य'[330] - इति। तच्च पूर्ववृत्तित्वमाकाशज्ञाननिरूपितम्। परन्तु पूर्ववृत्तित्वं पुन: कुलालपितापि भवितुमर्हति घटकार्यं प्रति कुलालपितृत्वमात्रावच्छिन्नत्वेन। अत: यद्यपि ग्रन्थकारेण आकाशमात्रस्य पूर्ववृत्तित्वपदाध्याहारेण निर्वचनं स्वीकृतम्; परन्तु तत्र कुलालपितुरपि संग्रहणं सिध्यति तादृशधर्मवत्त्वादिति।

- **पञ्चमान्यथासिद्ध:**

पञ्चमान्यथासिद्धनिर्वचने अन्नंभट्टविश्वनाथयोरुभयो: मतसादृश्यं परिलक्ष्यते। अत: तयो: ग्रन्थकारयो: मतमेकत्रेणोपस्थाप्यते। यथा अवश्यक्लृप्तनियतपूर्ववर्तिभिन्ना: सर्वे अन्यथासिद्धा:। तेन कार्यविशेषं प्रति लघुनियतपूर्ववृत्तिभिन्नानामन्यथासिद्धसंज्ञेति। अन्नंभट्टमते 'अन्यत्र क्लृप्तनियतपूर्ववृत्तिनैव कार्य्यसम्भवे तत्सहभूतमन्यथासिद्धम्'[331] - इति। स्वीकृतञ्च विश्वनाथेनापि अन्नंभट्टाभिमतं प्राय: सिद्धान्तमुक्तावल्याम्। लघुनियतपूर्ववर्तित्वरूपमवश्यक्लृप्तत्वमिह बोध्यम्। तेन कार्योत्पत्तौ लघुनियतपूर्ववृत्तित्वस्यैव कारणत्वं, तद्भिन्नानां चान्यथासिद्धत्वम्। तथा यद् घटव्यक्तिं प्रति रासभस्य नियतपूर्ववृत्तित्वमस्ति तद् घटजातीयं प्रति लघुनियतपूर्ववर्तिभि: दण्डादिभिरेव घटोत्पत्तिसम्भवे रासभोऽन्यथासिद्ध:, रासभस्य कारणत्वाङ्गीकारे गौरवात्। एवं पाकजस्थले गन्धोत्पत्तिकाले गन्धं प्रति रूपप्रागभावस्यापि नियतपूर्ववृत्तित्वेऽपि गन्धं प्रति रूपप्रागभावस्य कारणत्वं नास्ति, गन्धाभावापेक्षया रूपप्रागभावस्य प्रतियोगिज्ञानस्य गौरवेणोपस्थिते:। लघुत्वं तावत् त्रिविधम्। यथा शरीरकृतम्, उपस्थितिकृतं, सम्बन्धकृतञ्च। तत्र घटादिद्रव्यप्रत्यक्षं प्रत्यनेकद्रव्यसमवेतत्वापेक्षया महत्त्वस्य कारणतायां शरीरकृतं लाघवम्। गन्धोपपत्तौ गन्धप्रागभाव एव उपस्थितिकृतं लाघवमित्युक्तं पूर्वम्। स्वजन्यचक्रभ्रमणवत्त्वेन घटोत्पत्तौ दण्ड एव कारणं, न तु दण्डत्वादि, सम्बन्धकृतलघुत्वात्। तेषामन्यथासिद्धसंज्ञा, स्वाश्रयजन्यचक्रभ्रमणवत्त्वेन युक्तत्वात्।

एतेषु पञ्चसंख्यकेष्वन्यथासिद्धेष्वन्तिम: आवश्यकोऽन्येषां चरितार्थत्वात्। तथा हि दण्डादिभि: अवश्यक्लृप्तनियतपूर्ववर्तिभिरेव कार्यसम्भवे दण्डत्वादिकमन्यथाद्धम्। न च वैपरीत्वे किं विनिगमनकमिति वाच्यं, दण्डत्वस्य कारणत्वे दण्डघटितपरम्परया: सम्बन्धकल्पने गौरवात्। एवमन्येषामप्यनेनैव चरितार्थत्वं सम्भवति। एवञ्चान्यथाासिद्धिशून्यत्वे सति कार्याव्यवहित-प्राक्क्षणावच्छेदेन कार्यतावच्छेदकसम्बन्धावच्छिन्नकार्याधिकरणवृत्तिकारणतावच्छेदकसम्बन्धावच्छिन्ना-त्यन्ताभावाप्रतियोगितावच्छेदकधर्मवत्त्वं कारणत्वमिति यावल्लक्षणम्।

- **कारणभेदनिरूपणम्**

श्रीमान् विश्वनाथपञ्चाननभट्टाचार्य: कारणभेदनिरूपणार्थं भाषापरिच्छेदे प्रत्यक्षखण्डे लिलेख --

'समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम्।
एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम्।।'[332] - इति

---

[330] त.सं. पृ0सं0 90.

[331] त.सं. पृ0सं0 90.

[332] कारि. पृ0सं0 113.

[A First International Electronic Peer-reviewed Quarterly Refereed-
**UGC Approved** (41039), **SCOPUS** Registered Sanskrit Tri-lingual Journal with **Journal Factor**]
**URL-** www.jahnavisanskritejournal.in **ISSN**-0976-8645 **ISSUE**-44 , **YEAR** 11, **VOL** -I, DOI-30-01-2021 | Since 2010

कारणलक्षणनिर्वचने तत्रभवता कारणत्वमिति पदाध्याहारं कृतम्। अत: तन्मते कारणत्वमेव विभाज्यमिति सुस्पष्टम्। ननु ग्रन्थान्तरेषु कारणमेव विभाज्यत्वेन सिध्यति। अत: कारणस्यैव भेदप्रतिपादनं दृश्यते। यथा अन्नंभट्टोपाध्यायमते 'कारणं त्रिविधम् समवाय्यसमवायिनिमित्तभेदात्' - इति। तर्हि कथमस्य व्यतिरेकोऽत्र? ननु कारणस्य विभागेन का हानि:? अथ संशयस्य विमर्शणम्। ज्ञातव्यमिदं कारणस्य त्रिविध: विभाग: न सम्भवति। ननु किं तावत् विभागस्वरूपम्? सामान्यधर्मावच्छिन्नत्वे सति साक्षात् तादृशसामान्यधर्मव्याप्यत्वे सति स्वस्वविरूद्धधर्मावच्छिन्नत्वं विभागत्वमिति। सामान्यधर्मावच्छिन्नानां साक्षाद्व्याप्यपरस्परविरूद्धधर्मावच्छेदकावच्छिन्नानां धर्मिणां प्रतिपादनमित्यभिप्रेत:। स च परस्परविरूद्धधर्म: विभाजकधर्म:। यथा रूपादिचतुर्विंशतिसंख्यकगुणविभागे गुणं विभाज्यं, तदवच्छेदकधर्मस्तावत् गुणत्वम्। तच्च समवायेन रूपादिसकलगुणपदार्थवृत्तित्वात् सामान्यधर्म:। तस्मादत्र साक्षात् गुणत्वव्याप्यपरस्परविरूद्धधर्म एव विभाजकधर्म:। यथा रूपत्वरसत्वादिधर्मा:। तेषामेकाधिकरणवृत्तित्वाभावात् परस्परविरूद्धधर्मवत्त्वं सिध्यतीति। विभाज्यं कारणं, विभाज्यतावच्छेदकधर्म: कारणत्वमिति। विभाजकधर्मा: यथा समवायिकारणत्वम्, असमवायिकारणत्वम्, निमित्वकारणत्वञ्चेति। एते धर्मा: कारणत्वस्य साक्षाद्व्याप्यत्वेऽपि परस्पराविरूद्धा:, एकाधिकरणवृत्तित्वात्। यथा घटसमवायिकारणकपालप्रत्यक्षे तद्विषयकजन्यज्ञानस्य समवायिकारणमात्मा, चक्षुर्कपालसंयोग: असमवायिकारणं, कपालस्तु निमित्तकारणमिति। एवं घटस्या समवायिकारणं कपालद्वयसंयोग: प्रत्यक्षं प्रति निमित्तकारणं भवति। तथा च ज्ञानसमवायिकारणमात्मा ईश्वर: वा जन्यपदार्थानां सामान्यकारणत्वेन प्रतिभाति सदैव। ननु प्रत्येककार्यस्य पृथक् विशेषकारणविभागनिर्धारणेन संशयनिराकरणमिति चेत्, न समवायिकारणादीनामनन्तप्रसङ्गात्। तच्च विशेषकारणविभागनिर्धारणं यथा घटकार्यमात्रस्य कपालं समवायिकारणं, कपालद्वयसंयोग: असमवायिकारणं सिद्धम्। नैतस्य व्यतिरेक: कदापि सिध्यतीति। एवं प्रत्येककार्यस्य अध्याहारप्रसङ्ग:। अत: लाघवात् कारणसामान्यज्ञानमेव स्वीकरणीयम्। नात्र जातिवाचकत्वेन सामान्यपदाध्याहार:। कारणविषयकसार्वत्रिकज्ञानमत्र विवक्षितम्। तस्मात् कारणता कारणत्वं वा विभाज्यं, तदवच्छेदकधर्म: कारणतात्वमिति। तेन समवायिकारणतात्वम्, असमवायिकारणतात्वम्, निमित्वकारणतात्वञ्च विभाजकधर्मा:। अनेन पूर्वोक्तं विभागस्वरूपं संगच्छतेऽत्र। समवायिकारणतात्वावच्छिन्नेन समवायिकारणतामात्रस्य संग्रहणात् नात्र घटादिपदार्थसकलानामन्तर्भावापत्ति:। अयमाशय: सामान्यत्वात् समवायिकारणता समवायिकारणत्वं वा कपालादिसमवायिकारणेषु वर्तते। तेन समवायिकारणत्वादीनाम् एकाधिकरणवृत्तित्वप्रसङ्ग: न सिध्यति। तस्मात् भाषापरिच्छेदकारस्य समवायिकारणत्वमिति पदस्यार्थ: समवायिकारणतात्वावच्छिन्नेन ग्रहणीयम्। एवमितरयोरपि बोध्यव्यम्। न्यायनयज्ञैरेव एतत्सर्वमवगन्तव्यम्। ननु तर्कसंग्रहादिग्रन्थोक्तं कारणभेदनिर्वचनं व्यर्थं साक्षात् कारणस्य विभागवचनादिति चेत्, न। तत्रापि कारणभेद: पूर्वोक्तशास्त्रानुरोधमेव कृत: ग्रन्थकारेण। परन्तु साक्षात् पदाध्याहारेण नोक्तम्। वस्तुत: बालानां सुखबोधाय लिलेख तर्कसंग्रहमन्नंभट्टोपाध्याय:। कारणस्योपर्य्युक्तं विश्लेषणं बालानां सुखबोधान्तराय:, अत: तन्नोक्तमिति ग्रन्थकार: मन्ये।

ननु कारणत्वविभागनिर्वचने विश्वनाथोपाध्यायेन कारणत्वं हेतुत्वमिति भिन्नपदद्वयाध्याहारे का युक्ति:? यत: प्रथमपदमात्रेण कार्यसिद्धत्वात् किमर्थं द्वियीयस्य संग्रह:? इत्यस्मिन् विषये महादेवभट्टेन रामरूद्रभट्टाचार्येण च किमपि नोक्तम्। वस्तुत: सर्वत्र कारणत्वपदस्यैव व्यवहार: परिलक्ष्यते। विश्वनाथोपाध्यायेन स्वयमपि सिद्धान्तमुक्तावल्यां कारणत्वपदमध्याहृतम्। तस्मादेवं भवितुमर्हति। यथा उक्तपदयो: अर्थाध्ययनादस्माभिर्ज्ञायते कारणत्वं नाम कार्योत्पादकत्वमिति। ननु तादृशसामर्थविशिष्टत्वादसमवायिकारणस्यापि तच्छंज्ञालाभप्रसक्ति:। तस्मादुत्पादकत्वञ्चात्र कारणतावच्छेदकसम्बन्धनिरूपितम्। तेन कार्याधिकरणे तादृशसम्बन्धवृत्तित्वेन विवक्षितकार्यपदार्थं प्रति मुख्यं कारणं तावत्

[A First International Electronic Peer-reviewed Quarterly Refereed-
**UGC Approved** (41039), **SCOPUS** Registered Sanskrit Tri-lingual Journal with **Journal Factor**]
**URL-** www.jahnavisanskritejournal.in **ISSN**-0976-8645 **ISSUE**-44 , **YEAR** 11, **VOL** -I, DOI-30-01-2021 Since 2010

समवायिकारणम्। समवायिकारणसापेक्षं तावदसमवायिकारणं तत्कारणप्रत्यासन्नत्वात्। इदानीं हेतुत्वपदार्थविमर्शः। उक्तपदस्यात्र द्विविधोऽर्थः ग्रहणीयः। आद्यस्तत्र साधकतममिति। यथा पटकार्यस्य तन्तुसंयोगः। न तु पटसमवायिकारणविच्छिन्नतन्तसमूहेन तुरीवेमादिनिमित्तकारणसमूहेन च पटोत्पत्तिर्सम्भवेत्। यतः विच्छिन्नतन्तुतः पटं न जन्यत इति। तादृशतन्तूनां विशेषक्रमेण संयोगेन पटोत्पत्तिर्भवति। अतः सकलभावकार्याणाम् असमवायिकारणमेव साधकतममित्यभिप्रायः। अभावस्य समवायिकारणाभावात् न तु तस्य असमवायिप्रसङ्गः। शब्दशास्त्रे सामान्येप्सितमात्रे ईप्सितपदार्थे सम्प्रदानकारकं संयुज्यते। परन्तु तस्यैव पदार्थस्य ईप्सिततमत्वेन कर्मसंज्ञा सिध्यति। अत्रैवं बोध्यव्यम्। साधकं समवायिकारणं, साधकतममसमवायिकारणमिति यावत्। हेतुत्वपदस्य शेषः अर्थः ज्ञापकमिति। तेन घटादिकार्याणां तत्तन्निमित्तकारणानि सिध्यन्ति सामर्थ्यविशिष्टत्वात्। यथा न तु कदापि घटकार्यं प्रति तुरीतन्तुवायादीनां निमित्तकारणता सम्भवेत् सामर्थ्याभावात्। एवं सर्वत्र बोध्यव्यम्।

- **समवायिकारणम्**

तर्कसंग्रहकारेण अन्नंभट्टोपाध्यायेन कारणलक्षणनिरूपणावसरे प्रोक्तम् 'यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्'[333] - इति। यस्मिन्नधिकरणे जन्यपदार्थः समवायसम्बन्धेन जायते तदधिकरणं समवायिकारणमिति वाक्यसामान्यार्थः सुस्पष्टः। अतः वचनस्यास्य यथार्थगूढार्थबोधार्थं गोवर्धनमिश्रेण न्यायबोधिन्यामुक्तम् 'समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणत्वं समवायिकारणत्वम्'[334] इति। कार्यपदार्थस्य कारणपदार्थवृत्तिसम्बन्धः समवायः कार्यतावच्छेदकसम्बन्धः, कारणपदार्थस्य कार्याधिकरणवृत्तिससम्बन्धः तादात्म्यं कारणतावच्छेदकसम्बन्धश्चेति। भाषापरिच्छेदकारमते 'यत्समवेतं कार्यं भवति ज्ञेयन्तु समवायिजनकं तत्' - इति। यत्र समवेतं सत्कार्यमुपपद्यते तत्कार्याधिकरणं समवायिकारणमिति। कार्याधिकरणवृत्तिश्च कारणतावच्छेदकसम्बन्धेन ग्रहनीयम्। स च सम्बन्धः विभिन्नाः। तथा च स्वकारणतावच्छेदकयद्धर्मविशिष्टे यद्धर्मविशिष्टं कार्यं समवायेनोपपद्यते तद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्नं समवायिकारणमित्यर्थः। यथा तन्तवः पटस्य समवायिकारणम्। पटः कार्यमवयवी; तन्तवोऽवयवाः। तस्मात् तयोः सम्बन्धः समवायः। तन्तुषु तन्तवस्तादात्म्येन वर्तन्ते। अतस्तन्तुनिष्ठा कारणता तादात्म्यसम्बन्धावच्छिन्ना, पटनिष्ठा कार्यता समवायसम्बन्धावच्छिन्ना। पटत्वावच्छिन्नं कार्यं पटः पटकारणतावच्छेदकतन्तुत्वावच्छिन्ने तन्तुषु समवायसम्बन्धेनोत्पद्यन्त इति पटत्वावच्छिन्नं प्रति तन्तुत्वावच्छिन्नं समवायिकारणम्।

समवायसम्बन्धेन घटाधिकरणे कपालादौ कपालादेस्तादात्म्यसम्बन्धेनैव सत्त्वात् समवायसम्बन्धाावच्छिन्नघटत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकपालत्वावच्छिन्नकारणतायाः कपालादौ सत्त्वाल्लक्षणसमन्वयः। किं बहुना समवायेन जन्यभावत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन द्रव्यस्यैव कारणत्वाज्जन्यभावेषु द्रव्यगुणकर्मसु द्रव्यमेव समवायिकारणं भवति। अयमाशयः समवायेन गुणकर्मादिषु घटादिजन्यद्रव्यानां वृत्तित्वाभावात् शास्त्रासिद्धाच्च गुणकर्मादीनां समवायिकारणत्वापत्तिः। अतः जन्यद्रव्ये तत्तद्रव्यावयवाः समवायिकारणस्वरूपाः भवन्तीति न्यायसिद्धान्तः। तथोक्तं विश्वनाथेन 'समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्' - इति।

ननु पटादयो यदैव जायन्ते तदैव तद्गतरूपादयोऽपि जायन्ते, तस्मात् तयोः कार्यकारणसम्बन्धः नास्तेव, समकालीनत्वेन पौर्वापर्याभावादिति चेत्, न। गुणगुणिनोः समकालीनोपपत्तिप्रसङ्गापत्तेः। न च तयोरेककालीनत्वं शास्त्रसिद्धम्। यथा द्रव्यं

---

333 त.सं. पृ०सं० 98.

334 तर्क.न्याय. पृ०सं० 44.


CONTACT US- JAHNAVISANSKRITJOURNAL@GMAIL.COM WEBSITE-JAHNAVISANSKRITEJOURNAL.IN

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-44 , YEAR 11, VOL -I, DOI-30-01-2021 | Since 2010

निर्गुणमेव प्रथममुत्पद्यते, अनन्तरं तत्र गुणादयः उत्पद्यन्ते। समकालोत्पत्तौ गुणगुणिनोः अभेदप्रसङ्गः। अपि च तेन तयोः कारणसाजात्यप्रसङ्गः। शास्त्रविरुद्धत्वात् तत् असम्भवः। तस्मात् गुणेभ्यः पूर्वभावित्वाद् द्रव्यं हि गुणादीनां समवायिकारणम्। न च प्रथमे क्षणे गुणाश्रयत्वाभावाद् द्रव्यत्वापत्तिरिति वाच्यम्, गुणाश्रययोग्यत्वं द्रव्यत्वमिति द्रव्यलक्षणात्। योग्यता च गुणानामत्यन्ताभावाभावः। अर्थात् प्रतियोगिव्यधिकरण-गुणाभावाभावो हि गुणाश्रययोग्यता। तेन यद्यपि उत्पत्तिक्षणे जन्यद्रव्ये गुणाभावो विद्यते, तथपि द्वितीयक्षणे गुणाभावस्य प्रतियोगिनः गुणस्योदयात् गुणाभावः प्रतियोगिव्यधिकरणो न भवति। तेन प्रतियोगिसमानाधिकरणगुणाभावस्य जन्यद्रव्ये विद्यमानत्वात् गुणाश्रयत्वं द्रव्यत्वमिति द्रव्यलक्षणं प्रथमे क्षणे जन्यद्रव्ये समन्वितम्। तस्मान्नाव्याप्तिः।

- **असमवायिकारणम्**

असमवायिकारणशब्दस्य यथाश्रुतार्थस्तावत् समवायिकारणभिन्नजातीयः समवायसम्बन्धावृत्तिपदार्थविशेषः। परन्तु अनेन असमवायिकारणनिर्वचनेन निमित्तकारणे विवक्षितलक्षणस्यातिव्याप्तिप्रसक्तिः। यथा घटोत्पत्तौ समवायिकारणकपालभिन्नजातीयस्य कुम्भकारस्य समवायेन कपालावृत्तित्वात् तस्यासमवायिकारणापत्तिः। असिद्धः हि तत्। अतः न समवायिकारणमसमवायिकारणमिति नञ्तत्पुरुषसमासनिष्पन्नेन तदर्थं ग्रहणीयम्। नन्वत्र नञः कोऽर्थः? यतः नञः षड्विधार्थाः शब्दशास्त्रप्रसिद्धाः। न चात्र नञोऽभावरूपार्थो विवक्षितः। तेन निमित्तकारणे तुरीवेमादावतिव्याप्तिप्रसङ्गः, समवायिकारणभिन्नत्वात्। अतोऽत्र नञः सादृश्यरूपार्थ एव विवक्षितः। यथा समवायिकारणभिन्नत्वे सति समवायिकारणसादृश्यत्वमसमवायिकारणत्वमित्यर्थः। ननु किं तावत् सादृश्यम्? समवायिकारणवत् असमवायिकारणमपि कार्यपूर्ववृत्ति कार्यकालवृत्ति च भवेत्। तथा चासमवायिकारणनाशे समवायिकारणनाशवत् भावकार्यनाशः सम्भवेदित्युभयोः सादृश्यम्। विश्वनाथपञ्चाननेन सिद्धान्तमुक्तावल्यामुक्तम् 'समवायिकारणे आसन्नं प्रत्यासन्नं कारणं द्वितीयमसमवायिकारणम्'[335] - इति। समवायिकारणप्रत्यासन्नत्वे सति कार्योत्पादनसामर्थावच्छिन्नत्वमसमवायिकारणत्वम्। प्रत्यासन्नत्वं समवायेन समवायिकारणवृत्तित्वम्। यथा तन्तुसंयोगः पटस्यासमवायिकारम्। गुणपदार्थत्वात् तन्तुसंयोगः पटसमवायिकारणे तन्तुषु समवायेन विद्यमानः सन् पटमुत्पादयति। न हि विच्छिन्नतन्तुतः पटोत्पत्तिर्सम्भवेत् संयोगाभावात्। कार्यैकार्थप्रत्यासत्तिकारणैकार्थप्रत्यासत्तिभेदात् असमवायिकारणस्य समवायिकारणप्रत्यासन्नत्वं द्विविधम्। तर्कसंग्रहकारेण अन्नंभट्टेनोक्तम् 'कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति यत् कारणं तदसमवायिकारणम्' - इति। तत्र कार्येण पटेन सहैकस्मिन्नर्थे तन्तौ समवेतत्वात् तन्तुसंयोगः कार्यस्य पटस्यासमवायिकारणमिति कार्यैकार्थप्रत्यासत्तिः। पटसमवायिकारणेन तन्तुना सहैकस्मिन्नर्थे तन्तौ समवेतत्वात् तन्तुरूपं पटरूपस्यासमवायिकारणम्।

ननु किमर्थमिदं भेदनिरूपणम्? वस्तुतः असमवायिकारणं साक्षात्सम्बन्धेन (समवायेन) परम्परासम्बन्धेन (स्वसमवायिसमवायेन) च सम्भवति। कार्येण - इत्यत्र पटस्यासमवायिकारणं (तन्तुसंयोगः) गुणपदार्थत्वात् पटसमवायिकारणे (तन्तौ) साक्षात् समवायसम्बन्धमात्रवृत्तित्वेन पटमुत्पादयति। पटसमवायिकारणेन - इत्यत्र गुणपदार्थत्वात् तन्तुरूपं (स्व-) पटसमवायिकारणे तन्तौ (समवायि-) समवायसम्बन्धमात्रवृत्तित्वेन पटसमवेतपटरूपं (समवायः) उत्पादयति। अतः स्वसमवायिसमवायसम्बन्धत्वेन तन्तुरूपं पटरूपस्यासमवायिकारणम्। भावजन्यपदार्थानाम-समवायिकारणं सदैव गुणकर्ममात्रं भवत्येव। भाषापरिच्छेदकारमतानुसारं 'गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायि हेतुत्वम्' - इति। अतः

---

[335] कारि. पृ०सं० 114.

[A First International Electronic Peer-reviewed Quarterly Refereed-
UGC Approved (41039), SCOPUS Registered Sanskrit Tri-lingual Journal with Journal Factor]
URL- www.jahnavisanskritejournal.in ISSN-0976-8645 ISSUE-44 , YEAR 11, VOL -I, DOI-30-01-2021

Since 2010

समवायस्वसमवायिसमवेतत्वान्यतरसम्बन्धेन समवायिकारणे प्रत्यासन्नत्वे सत्यात्मविशेषगुणान्यत्वे सति कारणत्वमसमवायिकारणत्वमिति।

- **निमित्तकारणम्**

अन्नंभट्टमहाभागेन निमित्तकारणलक्षणनिर्वचने प्रोक्तम् 'तदुभयभिन्नं कारणं निमित्तकारणम्'[336] - इति। विश्वनाथमहाभागेन 'आभ्यां परं तृतीयं स्यात्'[337] - इति। अत्र तदुभय, आभ्याम् - इति पदद्वयं समवाय्यसमवायिकारणद्वयोपलक्षकम्। तेन च समवाय्यसमवायिकारणभिन्नं शेषः कारणं निमित्तकारणमित्यर्थः। ननु समवायिकारणासमवायिकारणभिन्नत्वमात्रोक्तौ प्रतियोगिनोः भिन्नं भिन्नं कार्यं प्रति भेदसत्त्वात् निखिलकार्यजातस्य अतिदुर्विज्ञेयतया तत्प्रतियोगिरूपेण समवाय्यसमवायिकारणद्वयस्याविज्ञानात् न तद्भिन्नत्वेन लक्षणं वाच्यमिति चेदुच्यते समवायिकारणत्वासमवायिकारणत्वाभ्यामित्यर्थः तदुभय, आभ्याम् - इति पदद्वयेन बोध्यः। भावप्रधाननिर्देशात् सर्वेषां समवायिकारणानां तथासमवायिकारणानाञ्च निर्देशो भवेत्।

निमित्तकारणभेदात् कारणतावच्छेदकसम्बन्धोऽपि विभिन्नो भवति। तदुदाहरणं तथा घटं प्रति दण्डः स्वजन्यभ्रिमजन्यभ्रिममत्वसम्बन्धेन निमित्तकारणम्। अतः कार्यतावच्छेदकसम्बन्धेन घटाधिकरणे कारणतावच्छेदक-स्वजन्यभ्रिमजन्यभ्रिममत्वसम्बन्धेन योऽभावः तस्याप्रतियोगी दण्डः। तेन दण्डे निमित्तकारणलक्षणसमन्वयः। एवं तुरीवेमादिकं पटस्य निमित्तकारणम्।

तच्च निमित्तकारणं साधारणासाधारणभेदात् द्विविधम्। तत्र कार्यसामान्यं प्रति साधारणनिमित्तकारणानि अष्टविधानि। यथा ईश्वरः, तज्ज्ञानेच्छाप्रयत्नाः, दिक्कालावदृष्टं, तत्तत्कार्याणां प्रागभावश्चेति। प्रतिबन्धकसंसर्गाभावस्तु नवमं साधारणनिमित्तकारणमिति प्राचीननैयायिकाः। असाधारणनिमित्तकारणानि तु कार्यभेदेनानेकविधानि।

- **उपसंहारः**

